

CSUGCKL 4
015,3N
23847
Acc.No: 23847

CAT NO-8611
HOLD ID-14288
BOOK NO-4
LOCATION-
57-B-1

कथाञ्जलि

KATHANJALI

A Collection of twelve stories
in
SANSKRIT & TAMIL



ACCESSION No 22847
DATE 13/10/06
015,3N

2004

KATHANJALI - a collection of Sanskrit- Tamil Children Stories.Sankrit Stories written by **Smt. Shanta VenkataRaman,** Chennai

First Edition : 2004

Copies : 500

© Rights Reserved by Smt. Shanta Venkata Raman

Price : **Rs. 25=00**

Published by :

Smt. Shanta Venkata Raman
Flat 'D' (Alsa) Samundram Apartments
24, 4th Seaward Road, Valmikinagar
Chennai - 41

Cover design and illustrations by Joseph Pramod

Printed at
Sudharma Offset Printers
Mysore- 570 004
Phone : 0821-2442835

Forwarded free of Cost
with the Compliments of
Rashtriya Sanskrit Samsthan
New Delhi.

Dedication

With profound respect and love
I dedicate this work to the fond memory
of my dear father

Late Sri Vidwan M. Krishna Pillai

who inspired me to learn Sanskrit.

PREFACE

Sanskrit - Tamil

Here is a collection of twelve traditional Indian stories written from memory : the sources being AIR Programmes, Television transmission, Stories which appeared in some newspapers and some of them narrated by friends and parents, way back in childhood. These stories are such that the moral of each one emerges directly and etches itself in a child's mind.

All the twelve stories presented here have already been published in Sanskrit some in **"Samskrithasri"**, *a Chennai based Sanskrit language magazine and others in* **"Sambhashana Sandesha"**, *another periodical published in the same language from Bangalore. They are now being brought out into six booklets ; each booklet giving these stories in Sanskrit along with their versions in one of the following six languages, viz., Hindi, Tamil, Malayalam, Kannada, Telugu and English. This enables the stories to be taken out of the confines of Sanskrit Classicism into the bright lights of languages of daily use thereby widening and increasing the reach and appeal of the ancient tales. This will also help some to brush up and improve their grasp of Sanskrit.*

In this booklet, twelve Sanskrit stories are presented along with their Translation into Tamil language is done by Mrs. Usha Subramanian, Chennai to whom my grateful thanks are due.

This idea of publishing these stories in Sanskrit and other languages was suggested to me by my brother-in-law. Sri G.R. Pillai, Kochi and encouraged by my late husband Sri Kylasamier Venkataraman to both of whom I am ever grateful.

The entire project was made possible by the gracious help and constant interest and guidance extended to me by late Sri J. Padmanabha Iyer, Kotturpuram, to whom I am ever indebted. I feel extremely sad that Sri Padmanabha Iyer passed away before this work comes out in print.

Shanta Venkataraman

CONTENTS

Sl. No.	Particulars	PageNo.
1.	सुधीरस्य बुद्धिमत्ता	1
2.	योगक्षेमं वहाम्यहम्	9
3.	पन्नो गर्दभाश्च	15
4.	शिक्षणं संपूर्णम्	19
5.	अनन्तरगामी	25
6.	अनुचिता स्पर्धा	31
7.	इष्टं किमपि, सिद्धमन्यत्	35
8.	भवितव्यता बलवती	39
9.	परिणयपरिधानम्	45
10.	ताना रीरी च	51
11.	प्रतीक्षा	59
12.	किमस्ति पेटिकायाम् ?	69

1. सुधीरस्य बुद्धिमत्ता

धर्मपुरीनामके राज्ये सत्यपालः नाम महाराजः आसीत् । सः अतीव दयालुः, विवेकी, सुशीलः च। सर्वदा प्रजानां हितचिन्तनमेव सः करोति स्म। प्रजाः यदा कदा वा आगत्य तस्मै स्वकीयं कष्टं निवेदयन्ति स्म। महाराजः अपि श्रद्धया तत् श्रुत्वा तस्य परिहारं चिन्तयति स्म।

एकदा सायङ्कालसमये कश्चन द्वारपालकः त्वरया धावन् महाराजस्य समीपम् आगत्य उक्तवान्-"महाप्रभो ! केचन अटविकाः आगताः सन्ति। ते भवन्तं द्रष्टुम् इच्छन्ति" इति।

महाराजः-"झटिति तान् अत्र प्रेषयतु" इति उक्तवान्।

आगतानाम् अटविकानां मुखे भीतिः दृश्यते स्म। महाराजः तान् सान्त्वयन् उक्तवान्-"भीतिः मास्तु। धैर्येण भवतां कष्टं निवेदयन्तु" इति।

महाराजस्य मृदुवचनानि श्रुत्वा तेषां प्रतिनिधिः उक्तवान् - 'महाप्रभो ! अरण्यवासिनः वयम् अतीव भीताः स्मः। अस्माकं भीतेः कारणं न वन्यमृगाः, अपि तु उग्रकायः दुष्टः कश्चन राक्षसः । सः गुहायां निवासं करोति। वने विद्यमानान् प्राणिनः, अरण्यवासिनः च हत्वा खादति । अस्मान् बहुधा पीडयति च। तेन सह अस्माभिः युद्धम् अपि कृतम्। परन्तु तेन न कोऽपि लाभः जातः। अतः भवान् तस्मात् राक्षसात् अस्मान् रक्षतु" इति।

अटविकानां वचनानि श्रुत्वा महाराजः उक्तवान्- "शीघ्रमेव भवतां कष्टस्य निवारणोपायं चिन्तयामि। भवन्तः निश्चिन्ताः भवन्तु" इति । सर्वे अटविकाः निश्चिन्ततया वनं प्रतिगतवन्तः।

1. புத்திசாலி சுதிரா

தர்மபுரி நாட்டை சத்யபாலா என்ற இரக்க குணமுள்ள, நேர்மையான, மிகச்சிறந்த அரசன் ஆண்டு வந்தான். தன் மக்கள் நலனே பெரிதென நினைத்து அவன் தன் மக்களை அன்போடு நடத்தி வந்தான். யாரும் எந்த நேரத்திலும் அவனைப் பார்த்து தன் குறைகளை கூற முடியும். அவன் அவர்கள் குறைகளைக் கேட்டு தன்னால் இயன்ற அளவுக்கு அவைகளை நிவர்த்தி செய்வான்.

ஒருநாள் மாலை நேரத்தில் அரண்மனைக் காவலன் ஓடிவந்து "அரசே! உங்களைக் காண சில காட்டுவாசிகள் வந்திருக்கிறார்கள்" என்று கூறினான். அரசன் உடனே அவர்களை உள்ளே அனுப்புமாறு கூறினான்.

காட்டுவாசிகள் மிகவும் பயந்து போயிருந்தனர். அரசன் அவர்களைப் பார்த்து "பயப்படாதீர்கள், தைரியமாக உங்கள் பிரச்சனையை கூறுங்கள்" என்றான்.

இதனால் தைரியமடைந்த காட்டுவாசிகளின் தலைவன், "அரசே! காட்டில் மிருகங்களால், தொல்லையில்லாமல் தைரியமாக வாழும் நாங்கள் இப்போது ஒரு பிரம்மாண்டமான கொடிய அரக்கனை நினைத்து கலக்கமடைந்து இருக்கிறோம். அவன் காட்டில் சுதந்திரமாக உலவி எங்கள் உயிருக்கும், எங்கள் ஆடு, மாடுகளுக்கும் மிகுந்த தீங்கிழைத்து வருகிறான். எங்களிடமுள்ள வில் அம்புகளால் அவனிடம் போரிட்டும் எந்தப் பலனுமில்லை. எங்களால் இரவில் நிம்மதியாக உறங்க முடியவில்லை. அரசே தாங்கள் தான் இதற்கு ஒரு முடிவுகட்டி எங்களை அந்தக் கொடிய அரக்கனிடமிருந்து காக்க வேண்டும்"புத்திசாலி சுதிராபுத்திசாலி சுதிரா என்றான்.

அவர்களின் குறை கேட்டு அவர்களைச் சமாதானப்படுத்திய அரசன் "விரைவிலேயே இதற்கு ஒரு முடிவு கட்டி அவனை அழிக்க ஏற்பாடு செய்கிறேன் "என்றான்.

अनन्तरदिने प्रातः महाराजः मन्त्रिणम् आहूय सर्व वृत्तान्तं श्रावयित्वा- 'यः एतस्य राक्षसस्य मारणं करोति,.तस्मै वीरपुरुषाय लक्षं सवुर्णनाणकानि दीयन्ते इति सर्वत्र राज्ये उद्घोषणं कारयतु' इति उक्तवान् । तदनुसारम् उद्घोषणं कारितम्। राज्ये सर्वत्र वार्ता प्रसृता।

तस्मिन् एव दिने सायङ्काले रुद्रः नाम कश्चन दृढकायः पुरुषः राजास्थानम् आगतवान्। सः मन्त्रिणम् उक्तवान्- ''तं राक्षसं मारयितुम् अहं प्रयत्नं करोमि। तदर्थं मह्यम् एकः अश्वः तीक्ष्णः खड्गः किञ्चित् धनं चापि आवश्यकम्' इति। मन्त्री रुद्राय आवश्यकानि वस्तूनि दत्तवान्।

परेद्यवि प्रातः रुद्रः अश्वम् आरुह्य, खड्गं गृहीत्वा वनं प्रति गतवान्। अनतिकाले एव तेन राक्षसस्य निवासस्थानं दृष्टम्। गुहायाः द्वारे एव राक्षसः

அரசனின் வாக்குறுதிகளால் திருப்தியடைந்து நிம்மதியான காட்டுவாசிகள், அரசனை வணங்கிக் காட்டுக்குத் திரும்பிச் சென்றனர்.

அடுத்த நாள் காலை அரசன் தன் மந்திரி சபையைக் கூட்டி இந்தப் பிரச்சனையைப் பற்றி விரிவாக எடுத்துரைத்து, "நம் நாட்டிலுள்ள பலசாலிகளில் யார் காட்டிலுள்ள அந்த அரக்கனைக் கொன்று இதற்கு ஒரு முடிவு கட்டுகிறார்களோ அவர்களுக்கு ஒரு லட்சம் தங்க நாணயங்கள் பரிசாக வழங்கப்படும்" என பறைசாற்றி அறிவித்து விடுங்கள் என்றான். அது போலவே நாடெங்கும் அறிவிக்கப்பட்டது. இந்தச் செய்தி நாட்டின் மூலை முடுக்குகளில் எல்லாம் பரவியது.

மறுநாள் மாலை ருத்ரா என்ற திடகாத்திரமான ஒருவன் சம்பந்தப்பட்ட மந்திரியை சந்தித்து, நான் அந்த கொடிய அரக்கனைக் கொல்ல முயற்சி செய்கிறேன். அதற்காக எனக்கு ஒரு நல்ல குதிரையும், கூர்மையான ஒரு வாளும், கொஞ்சம் பணமும் தேவை என்று கூறினான். மந்திரியும் அவன் கேட்டவைகளை ஏற்பாடு செய்து கொடுத்தார்.

அடுத்த நாள் காலை ருத்ரா தன் வாளை எடுத்துக் கொண்டு குதிரை மீதேறி அந்தக் காட்டை நோக்கிச் சென்றான். மிக விரைவில் அந்த அரக்கனின் குகையை கண்டுபிடித்து அதன் வாயிலருகே சென்றான். அவனைக் கண்டதுமே ருத்ரா பயந்து போய்த்தன் வாழ்க்கையில் இதைப் போல் ஒரு பயங்கர மிருகத்தை கண்டதில்லை என எண்ணினான். ஆயினும் உடனே சுதாரித்துக் கொண்டு தைரியமாக அவனை நோக்கி முன்னேறினான்.

அப்போதுதான் ருத்ராவைக் கண்ட அரக்கன், ருத்ராவை தன் முஷ்டியால் வேகமாகத் தாக்கி அவனை வேற்றுலகிற்கு அனுப்பினான்.

स्थितवान् आसीत्। तं राक्षसं दृष्ट्वा रुद्रः अपि भीतः अभवत्। यतः तादृशं घोरं रूपं न कदापि दृष्टम् आसीत् तेन। तथापि सः क्षणाभ्यन्तरे धैर्यं सम्प्राप्य राक्षसस्य पुरतः गतवान्।

किन्तु तावति काले राक्षसः एव रुद्रं दृष्टवान्। सः एकेनैव मुष्टिप्रहारेण तं साक्षात् यमलोकं प्रति प्रेषितवान्।

रुद्रस्य मारणवार्तां श्रुत्वा महाराजः अतीव दुःखितः अभवत्। ततः परम् अपि बहवः युवकाः धनेच्छया राक्षसस्य मारणार्थं गतवन्तः। परन्तु ते सर्वे अपि राक्षसेन मारिताः अभवन्।

एकस्मिन् प्रभाते सुधीरः नाम कश्चन सामान्यकायः युवकः राजास्थानम् आगत्य मन्त्रिणम् उक्तवान् - "अहं राक्षसस्य मारणार्थं गच्छामि" इति।

मन्त्री तु तम् आपादमस्तकं दृष्ट्वा आश्चर्यचकितः सन् उक्तवान् - "अये मूर्ख ! बहवः दृढकायाः युवकाः तस्य मारणे विफलाः जाताः, मरणं प्राप्तवन्तः च । भवान् दृढकायः अपि न। कथं वा तेन राक्षसेन सह युद्धं कुर्यात् ?' इति।

मन्त्रिणः वचनं श्रुत्वा सुधीरः उक्तवान् - "यद्यपि न अहं दृढकायः, तथापि अहं मम बुद्धिबलात् एव तस्य मारणं कर्तुं शक्नोमि इति निश्चयेन वदामि। द्वित्रदिनाभ्यन्तरे एव तस्य राक्षसस्य शिरः कर्तयित्वा महाराजस्य पदतले अर्पयिष्यमि। अत्र न कोऽपि संशयः' इति।

मन्त्री अपि "तथैव अस्तु" इति उक्त्वा तस्मै आवश्यकानि वस्तूनि दत्तवान्।

सुधीरः ततः राक्षसस्य आवासस्थानं प्रति प्रस्थितवान्। किञ्चित् कालं

இதைக் கேட்டறிந்த அரசன் மிகவும் கவலை அடைந்தான். அதிலிருந்து பணத்திற்கு ஆசைப்பட்டு பல இளைஞர்கள் அரக்கனை அழிக்க முன் வந்து அந்த அரக்கனின் கைகளாலேயே மடிந்து போனார்கள்.

ஒருநாள் காலை, சுதிரா என்ற ஒரு சாதாரண மனிதன் மந்திரியைச் சந்தித்து தான் அந்த அரக்கனைக் கொன்று வருவதாகக் கூறினான்.

அவனை ஏற இறங்க பார்த்தபடி மந்திரி ஆச்சரியமாய் "பலசாலியான பலர் இதற்கு முன் முயன்று அந்த அரக்கன் கையால் மடிந்து போய்விட்டார்கள். உன்னைப் பார்த்தால் பலசாலியாகவும் தெரியவில்லை. நீ எப்படி அந்த அரக்கனைக் கொல்வாய்" என்று கேட்டார். மந்திரியின் வார்த்தைகளைக் கேட்ட சுதிரா, "நான் பலசாலியாக இல்லாமல் இருக்கலாம். ஆனால் என்னுடைய புத்தி கூர்மையால் கண்டிப்பாக இரண்டு அல்லது மூன்று நாட்களில் என்னால் அந்த அரக்கனின் தலையை வெட்டி அதை அரசனின் காலடியில் வைக்க முடியும்" என்றான்.

இதைக் கேட்ட மந்திரி "உன் எண்ணப்படியே ஆகட்டும்" எனக்கூறி அவனுக்கு தேவையானவைகளைக் கொடுத்து அனுப்பி வைத்தார்.

சுதிரா, உடனே அந்த அரக்கனின் இருப்பிடத்தை நோக்கிக் கிளம்பினான். காட்டில் அலைந்து திரிந்து கடைசியாக அந்த குகையின் வாயிலை அடைந்தான். குகையின் வாயிலில் நின்றிருந்த அரக்கன் சுதிராவை பார்த்து இடிபோல உரக்கச் சிரித்து "என்னைக் கொல்ல வந்திருப்பவனைப் பார்" என்றான். திரும்பவும் சுதிராவை பார்த்து "முட்டாளே! என்னைக் கொல்லவா வந்து இருக்கிறாய், உண்மையாகவே நீ மிகவும் தைரியசாலிதான். போதும் உன் தைரியம். நீ உயிர் வாழ ஆசைப்பட்டால் உடனடியாக இங்கிருந்து போய்விடு" என்றான்.

यावत् वने इतस्ततः अटन् राक्षसावासस्थानं प्राप्तवान्। गुहाद्वारे एव राक्षसः स्थितवान् आसीत्। सः सुधीरं दृष्ट्वा 'एषः मां हन्तुम् आगतवान्' इति मत्वा उच्चैः अट्टहासं कृतवान्।

सुधीरम् उद्दिश्य- 'भोः मूर्खः! मां हन्तुं भवान् आगतवान्? भवतः धैर्य प्रशंसनीयम् एव । अलं साहसेन! यदि भवान् जीवितुम् इच्छति, तर्हि इदानीम् एव इतः प्रतिनिवर्तताम्'' इति गर्जितवान् ।

क्षणकालं भीतः अभवत् सुधीरः । तथापि सः धैर्येण राक्षसस्य समीपं गतवान् । झटिति एव स्वहस्तेन गृहीतम् अतीव कटुयुक्तमरीचिकाचूर्ण राक्षसस्य उपरि बलात् प्रक्षिप्तवान् । तत् चूर्ण राक्षसस्य नेत्रयोः पतितम् । तेन सः महतीं वेदनाम् अनुभवन् नेत्रे निमील्य उच्चैः आक्रोशं कृतवान्।

सुधीरः वेगेन खड्गं चालयन् एकेन एव प्रहारेण तस्य शिरः छित्वा भूमौ पातितवान् ।

ततः तत् शिरः गृहीत्वा राजधानीं प्रत्यागत्य महाराजाय प्रदर्शितवान् । महाराजःलक्षं सुवर्णनाणकानि दत्तवान् । सुधीरः अपि दारिद्र्यात् विमुक्तः अभवत् । अरण्यवासिनः अपि कष्टविमुक्ताः सन्तः सन्तोषम् अनुभूतवन्तः।

முதலில் சிறிது பயந்த சுதிரா, சுதாரித்து தைரியமாகக் குதிரையை ஓட்டி அவனருகில் சென்றான். அவனை நெருங்கியதும் நொடிப்பொழுதில் தன்னிடமிருந்த் பொட்டலத்தைப் பிரித்து அதிலிருந்த மிளகாய் பொடியை எடுத்து அரக்கனின் முகத்தில் தூவினான். கண்களில் மிளகாய்ப் பொடியின் எரிச்சலால் பார்க்க முடியாமல் தவித்த அரக்கன் பெருங்குரலெடுத்துக்கத்தினான்.

உடனே சுதிரா தன் குதிரையில் இருந்து இறங்கி அவனருகில் சென்று தன் வாளால் ஒரே வீச்சில் அவன் தலையை வெட்ட, அது தரையில் விழுந்தது.

பிறகு அந்தத் தலையை எடுத்துக் கொண்டு சுதிரா வெற்றிகரமாக அரண்மனை திரும்பினான். அரசனும் அவனுக்கு ஒரு லட்சம் தங்க நாணயங்களைப் பரிசாக வழங்கினான். சுதிராவும் தன் வறுமை நீங்கி சந்தோஷமாகச் செல்ல, காட்டுவாசிகளும் தங்கள் குறை நீங்கி சந்தோஷமாகவும், அமைதியாகவும் வாழ்ந்தனர்.

2. योगक्षेमं वहाम्यहम्

कृष्णपुरीनामके ग्रामे सुरेशो नाम अष्टवयस्कः बालः स्वमात्रा सह निवसति स्म। तस्य पिता नारायणः वर्षद्वयात् पूर्वं दिवंगतः। ततः पूर्वं ते नगरे न्यवसन्। तदा नारायणः कस्मिंश्चित् कार्यालये उद्योगं कुर्वन् आसीत्। तस्य मरणानन्तरं सुरेशः मात्रा सह स्वग्राममागत्य जीवितं नीतवान्। सुरेशस्य माता रत्नाम्बा नाम। तयोः कुटिकायाम् एकम् उद्यानम् अङ्गणं च। उद्याने बहुविधफलवृक्षाः पुष्पलताश्च आसन्। रत्नाम्बा अतीव गुणवती, कृष्णभक्ता च। सा सर्वदा धर्मानुष्ठानं कुर्वती आयुरक्षपयत्। कृष्णस्य भगवतः नामैव सर्वदा तस्याः मनसि, जिह्वायां च। स्वस्य सुखजीवनाय सा एकस्य धनिकस्य गृहे पात्रक्षालनं शोधनं पाचनम् इत्यादि प्रतिदिनं कुर्वती आसीत्। तथा लब्धेन वेतनेन अनायसेन कालयापनम् अकरोत्।

रत्नाम्बा दरिद्रा अपि स्वपुत्रं प्रतिदिनं विद्यालयं गन्तुं, सम्यक् पाठं पठितुं च प्रेरितवती, यतः सद्विद्याभ्यासात् बहवः सद्गुणाः उपलब्धुं शक्यन्ते इति तस्याः मतिः। 'विद्याधनं सर्वधनात् प्रधानम्' इति तस्याः विश्वासः। किन्तु तेन पाठशालां प्राप्तुम् एकं लघुवनमतिक्रम्य गन्तव्यमासीत्। रत्नाम्बा प्रतिदिनं स्वस्य गृहकार्यं सर्वं पूरयित्वा सुरेशेन सह वनस्य परप्रान्तं यावत् गच्छन्ती आसीत्। यदा तौ वनस्य परप्रान्तं प्राप्नुतः तदा स बालः जवेन विद्यालयं प्रति धावेत्। तदनु रत्नाम्बा धनिकस्य गृहे कार्यं कर्तुं निवर्तेत। सायंकाले सुरेशम् आनेतुं तया वनान्तं गन्तव्यमासीत्। एवं दिनानि परियापितानि।

अथ एकस्मिन् दिने रत्नाम्बा अस्वस्था। अतः पुत्रेण सह गन्तुं न अशक्नोत्। सा बालम् अवदत् यत् त्वं निर्भयं सावधानम् एकाकी गच्छसि, यतः अहम् अस्वस्था इति। सुरेशः सधैर्यं गतवान्। सायंकाले

2. கோபாலன்

கிருஷ்ணகிரியைச் சேர்ந்த ஒரு சிறு கிராமத்தில் சுரேஷ் என்ற எட்டு வயதுச் சிறுவன் தன் தாயுடன் வசித்து வந்தான். அவனுடைய தந்தை நாராயணா இரண்டு வருடங்களுக்கு முன் காலமாகி விட்டார். அதற்கு முன் அவர் நகரத்தில் உள்ள ஒரு அலுவலகத்தில் வேலை செய்து வந்ததால் அவர்கள் அங்கேயே வசித்து வந்தனர். அவருடைய காலத்திற்கு பிறகு சுரேஷ் தன் தாயுடன் இந்த கிராமத்திற்கு வந்தான். சுரேஷின் தாயின் பெயர் ரத்தினாம்பா. அவர்களுடைய சிறிய வீட்டில் ஒரு தோட்டமும் வீட்டைச் சுற்றிச் சிறிய இடமும் இருந்தது. அவர்களுடைய தோட்டத்தில் பூத்துக் குலுங்கும் பூச் செடிகளும், பழங்களும், மரங்களும் இருந்தன. நல்ல கருணை உள்ளம் கொண்ட ரத்தினாம்பா மிகச் சிறந்த கிருஷ்ண பக்தை. நல்ல காரியங்களை செய்வதிலேயே அவள் காலத்தை ஓட்டி வந்தாள். அவள் சொல்லும் செயலும் எப்போதும் பகவான் கிருஷ்ணர் பற்றித்தான். இருந்தது அவள் ஒரு பணக்காரரின் வீட்டில் பாத்திரம் தேய்த்தும், துணி துவைத்தும், சமையல் போன்ற காரியங்களை செய்தும் வாழ்ந்து வந்தாள். இவைகளின் மூலம் கிடைத்த வருவாயில் சிரமமின்றி வாழ்க்கையை நடத்தி வந்தாள்.

அவள் வறுமையில் வாழ்ந்தாலும் தன் மகனைப் பள்ளியில் சேர்த்துப் படிக்க வைத்து, அவன் தினசரி பள்ளி சென்று நன்றாகப் பாடம் படிக்க வேண்டும் என விரும்பினாள். நல்ல குணாதிசயங்களைப் பெற நல்ல படிப்பு அவசியம் என்று நம்பினாள். கல்வியைப் போன்ற மிகச் சிறந்த செல்வமில்லை என்றும் எண்ணினாள்.

ஆனால் சுரேஷ், பள்ளியை அடைய ஒரு காட்டைக் கடந்து செல்ல வேண்டியிருந்தது. ஒவ்வொரு நாளும் வீட்டில் வேலையை முடித்து சுரேஷைக் காட்டின் மறுமுனையில் சென்று விட்டு

गृहं प्रत्यागम्य सः उक्तवान्। "अहं वने गोपालं नाम एकं बालं दृष्टवान् । सः मम ज्येष्ठसहोदरवत् सस्नेहं वनान्तं गन्तुं साहाय्यं कृतवान् । सः वेणुवादने अतिनिपुणश्च " इति। इत्थं बालेन कथितां वार्तां श्रुत्वा माता विस्मिताऽभूत्। कोऽपि सहृदयः बालः स्यात् इति अचिन्तयत्।



कतिपयदिनानाम् अनन्तरं सुरेशः मातरम् उक्तवान्। "अम्ब ! परेद्युः सायंकाले अस्माकं वर्गशिक्षिकायाः जन्मदिनाघोषः अस्ति। अतः कालविलम्बेन प्रत्यागमिष्यामि। माम् आनेतुं भवती आगमिष्यति वा ? अपरं च मम सहपाठिनः सर्वे शिक्षिकायै उपहारान् दास्यन्ति । किमहं दास्यामि" इति।

एतत् श्रुत्वा रत्नाम्बा अतीव दुःखिता, यतः तस्याः सकाशे किञ्चिदपि धनं न आसीत् । तथाऽपि परेद्युः स्वस्य उद्यानपुष्पैः निर्मितम् एकं गुच्छं

வருவாள். அங்கிருந்து அருகில் இருக்கும் பள்ளிக்கு சுரேஷ் ஓடுவான். அதன்பிறகு ரத்னபாலா அந்த பணக்காரரின் வீட்டுக்குச் சென்று அங்குள்ள வேலைகளைக் கவனிப்பாள். அதேபோல் மாலையிலும் காட்டின் மறுமுனைக்குச் சென்று சுரேஷைப் பள்ளியிலிருந்து வீட்டிற்கு கூட்டி வருவாள்.

இதுபோல் காலம் கடந்து கொண்டிருக்க, ஒருநாள் ரத்னபாலாவுக்கு உடல்நிலை சரியில்லாததால் சுரேஷுடன் செல்ல முடியவில்லை. அதனால் சுரேஷிடம், நீ மெதுவாக தைரியமாகப் பள்ளிக்குத் தனியாகச் செல். என்னால் உன்னுடன் வர இயலவில்லை எனவும் கூறினாள். சுரேஷும் அதேபோல் சென்றான். மாலையில் திரும்பிய சுரேஷ் காட்டில் தான் கோபாலா என்ற பையனைச் சந்தித்ததாகவும், அவன் தனக்குத் துணையாக வந்ததாகவும் கூறினான். மேலும் "அவன் என்னுடைய சகோதரர் போல உணர்ந்தேன்" அவனுக்கு மிகச் சிறப்பாக புல்லாங்குழல் வாசிக்கவும் தெரியும் என்று கூறினான். சுரேஷ் சொன்னதைக் கேட்ட அவன் தாய் ஆச்சரியமடைந்தாள். அந்த பையன் மிகவும் கருணை உள்ளம் கொண்டவனாக இருக்கக்கூடும் என நினைத்தாள்.

சில நாட்கள் கழித்து ஒருநாள் சுரேஷ் "அம்மா, நாளை என் வகுப்பாசிரியருக்கு பிறந்த நாள். நான் வருவதற்கு சிறிது தாமதமாகும். என்னைத் திரும்ப அழைத்து வர நீங்கள் வருகிறீர்களா?.. அது மட்டுமல்ல.. என் வகுப்புத் தோழர்கள் அனைவரும் எங்கள் ஆசிரியருக்கு பரிசுகள் கொடுக்கிறார்கள். நான் என்ன கொடுப்பது?" என்று கேட்டான். இதைக் கேட்ட ரத்னபாலா, பரிசுப் பொருள் வாங்க தன்னிடம் பணமில்லையே என வருந்தினாள். ஆயினும் அடுத்த நாள் காலை தன் தோட்டத்தில் உள்ள மலர்களைக் கொண்டு ஒரு மலர்ச் செண்டு தயாரித்து அதை சுரேஷிடம் கொடுத்து அதை ஆசிரியரிடம் மரியாதையுடனும் தன்னடக்கத்துடனும் கொடுக்குமாறு கூறினாள்.

सुरेशाय दत्त्वा-''इदं गुच्छम् अध्यापिकायै सविनयं देहि'' इति उक्तवती।

सुरेशस्तु पाठशालां गत्वा पुष्पगुच्छम् अध्यापिकायाः हस्ते सादरम् अर्पयित्वा प्रणाममपि कृतवान्। तदा अध्यापिका तु साश्चर्यं - ''किमेतत् ? सुरेश, तव उपहारः पूर्वमेव मया लब्धः। पश्य'' इति वदन्ती एकं सुन्दरं भाण्डं प्रदर्शितवती। सुरेशेन न किञ्चित् अवगतम्। सः तूष्णीं भूत्वा प्रत्यागतवान्। प्रत्यागमनसमये माता पुत्रम् अपृच्छत् यत् 'कुत्र तव ज्येष्ठः गोपालः ? दर्शय मह्यम्', इति। तस्मिन् दिने गोपालः न आगतः। अथ स्वगृहं प्राप्य सुरेशः अध्यापिकायै दत्तम् उपहारभाण्डं अधिकृत्य अम्बायै निवेदितवान्। सर्वं श्रुत्वा रत्नाम्बा आश्चर्यचकिता आसीत्। क्षणेन तया सर्वम् अवगतमासीत् यत् गोपालः साक्षात् भगवान् कृष्णः एव। तदैव सा आत्मनः पूजाकोष्ठं गत्वा तत्र स्थापितस्य भगवतः कृष्णमूर्तेः पादयोः साष्टाङ्गं प्रणम्य उच्चैः विलपन्ती इत्थम् उक्तवती-''भोः देव, अहोरात्रं भवन्तं स्मराम्यहम्। अद्यावधि मह्यं भवद्दर्शनं न दत्तम्। मम पुत्रस्तु न जानात्येव भवान् कः इति। तस्मै भवान् गोपालनाम्ना दर्शनम् अनुदिनं कञ्चन समयमपि सहवासं च दत्तवान् । सदयं वद स्वामिन् किमर्थम् एतदिति।''

भूयोभूयः निराशतया, दुःखेन च जल्पितवती। उत्थाय सा किमप्यपश्यत् भगवतः प्रतिमास्थाने एकः बालः तिष्ठति ! सुरेशस्तु तं बालं दृष्ट्वा उच्चैः 'गोपाल गोपाल' इति आह्वानं कृतवान्। माता पुत्रश्च अतीव आह्लादभरितौ आस्ताम्। तदा गोपालनामा भगवान् रत्नाम्बां, पुत्रं च सस्मितम् 'ईदृशमेव मम भक्तानां योगक्षेमं वहाम्यहम्' इति प्रख्यापयति स्म।

சுரேஷும் பள்ளிக்குச் சென்று ஆசிரியரிடம் மலர்ச்செண்டை கொடுத்து ஆசிரியரை வணங்கினான். அப்போது அவன் ஆசிரியர் ஆச்சரியமாக!!.. "என்ன சுரேஷ் இது?., உன் பரிசுதான் ஏற்கனவே வந்துவிட்டதே! இதோ பார்" என்று கூறி ஒரு பொட்டலத்தை காட்டினார். சுரேஷுக்கு ஒன்றும் புரியவில்லை. ஒன்றும் பேசாமல் திரும்பினான். அவன் திரும்ப வந்ததும் அவன் தாய் "மகனே, எங்கே உன் சகோதரன் கோபாலா, காட்டு?.." என்று கூறினாள். அன்று கோபாலா வரவில்லை. சுரேஷ் தன் தாயிடம் நடந்தது அனைத்தையும் கூறி ஆசிரியர் கூறிய பரிசு பொட்டலம் பற்றியும் கூறினான். இதைக் கேட்ட ரத்னபாலா மிகவும் ஆச்சரியப்பட்டாள்.

திடீரென மின்னல் போன்ற ஒரு எண்ணம். ஒருவேளை கோபாலா வேறு யாருமன்றி பகவான் கிருஷ்ணன் தானோ என தோன்றியது. உடனே அவள் பூஜை அறைக்குச் சென்று அங்கு வைக்கப்பட்டிருந்த பகவான் சிலைக்கு முன் விழுந்து உறக்க "பகவானே! நான் உன்னை நாளும் பொழுதும் வணங்குகிறேன். உன் நினைவாகவே இருக்கிறேன். ஆனால் இன்று வரை எனக்கு நீ காட்சி தரவில்லை. ஆனான் என் மகன் முன் கேபாலாவாக காட்சி தந்திருக்கிறாய் உன்னை அறியாதவனாக அவன் இருந்தாலும் அவனுடன் சிறிது நேரம் இருந்திருக்கிறாய். இதெல்லாம் எதற்காக என தயவு கூர்ந்து சொல்" என கதறினாள். மீண்டும், மீண்டும் சோகமாகவும், சோர்வுடனும் புலம்பினாள்.

பிறகு எழுந்ததும் அங்கு அவள் கண்ட காட்சி... பகவான் கிருஷ்ணன் சிலை இருந்த இடத்தில் ஒரு சிறுவன் நின்று கொண்டிருந்தான்... சுரேஷ் அச்சிறுவனை நோக்கி "கோபாலா! கோபாலா!" என கூப்பிட்டான். தாயும் மகனும் மிகவும் சந்தோஷமடைந்தனர். பிறகு பகவான் புன்னகையுடன் அவர்களிடம் இப்படித்தான் நான் என் பக்தர்களைக் காப்பேன் எனக் கூறினார்.

3. पन्नो गर्दभाश्च

कदाचित् पन्नो नाम ग्रामीणः कश्चित् युवकः क्रयविक्रयविपणितः क्रीतान् दश गर्दभान् स्वग्रामम् आनयत्। पन्नो गर्दभम् एकम् आरूढः। तस्य पृष्ठतः नव गर्दभाः निभृतम् अनुगच्छन्तः आसन्। पन्नो भूयोभूयो मुखं परिवर्तमानः तानपश्यत्, सर्वे गर्दभा आगच्छन्ति वा न वा इति ज्ञातुम्। किञ्चिद्दूरं गत्वा पन्नः स्ववाहकगर्दभं स्थापयित्वा गर्दभान् गणयामास। तदा स नवैव गर्दभानपश्यत्। तस्य हृदये भयं जातम्, आश्चर्यञ्च। दशमो गदर्भः कुत्र गतः? इति सः परितः अपश्यत्। पुनरपि गर्दभानगणयत्। अहो, सर्वान् दश तत्रैव दृष्टवान्। पन्नः तुष्टः गर्दभं स्ववाहकम् आरुह्य ग्रामं गतवान्।



3. பன்னாவின் கழுதைகள்

ஒரு காலத்தில் பன்னா என்ற ஒரு கிராமத்து இளைஞன் சந்தையில் தான் வாங்கிய பத்து கழுதைகளுடன் திரும்பி வந்து கொண்டிருந்தான். ஒரு கழுதையின் மீது அவன் அமர்ந்திருக்க மற்ற ஒன்பது கழுதைகளும் அவனைத் தொடர்ந்து வந்தன. அவ்வப்போது அவன் திரும்பிப் பார்த்து தன் கழுதைகள் தன்னைத் தொடர்ந்து வருவதை உறுதி செய்து கொண்டாள். சிறிது தூரம் சென்றதும் மறுபடியும் தன் கழுதைகளை நிறுத்திப் பின்னால் வரும் கழுதைகளை எண்ணிப் பார்த்தான். மொத்தம் ஒன்பது கழுதைகள் மட்டுமே இருந்ததை பார்த்தான். அவனுக்கு பயமாகவும், ஆச்சரியமாகவும் இருந்தது. அந்த பத்தாவது கழுதை எங்கே சென்றது?.. அவன் சுற்றும் முற்றும் பார்த்தான். அவனால் அதைக் கண்டுபிடிக்க முடியவில்லை. பிறகு அவன் கழுதையின் மீதிருந்து இறங்கி மீண்டும் எண்ணிப்பார்த்தான். அங்கு பத்து கழுதைகளும் இருப்பது கண்டு ஆச்சரியப்பட்டான். அவன் சந்தோஷமாக தன் கழுதையின் மீது ஏறி தன் கிராமத்துக்கு கிளம்பினான்.

வழியில் முன்னா என்ற ஒரு நண்பனை சந்தித்தான். அவனை "முன்னா, முன்னா" என்று கூப்பிட்டு எனக்காக என் கழுதைகளை எண்ணுவாயா? நான் என் கழுதையின் மீது அமர்ந்தபடி எண்ணும்போது ஒன்பதுதான் இருக்கிறது. ஆனால் நான் கழுதை மீது இருந்து இறங்கி பிறகு எண்ணினால் பத்து இருக்கிறது. என்ன ஆச்சரியம்! என்னால் இதைப் புரிந்து கொள்ளவே முடியவில்லை. எனக்காக நீ இந்த கழுதைகளை எண்ணிச் சொல்வாயா?... என்று கேட்டார்.

முன்னா அவனையும் கழுதைகளையும் பார்த்து தனக்குள் சிரித்தபடி "இது மிகவும் ஆச்சரியமாக இருக்கிறது மொத்தம் பதினோரு கழுதைகள் இருக்கின்றன" என்றான். இதைக் கேட்ட

मार्गमध्ये तस्य मित्रं मुन्नो नाम तेन दृष्टः। "हे मुन्न ! मुन्न ! मम गर्दभान् गणय। मम वाहनं गर्दभम् आरूढो यदि गणयामि, तर्हि नवैव भवन्ति। यदि तस्मादवरुह्य गणयामि, तर्हि दश भवन्ति। किमेतत् ? अवगन्तुं न शक्नोमि। कृपया त्वमपि एकवारं गणय" इति उच्चैरवदत्।

मुन्नः तं तांश्च अपश्यत्। अन्तर्विहसन् उवाच- "हे पन्न ! अद्भुतमिदम्। अहंम् एकदश गर्दभान् पश्यमि" इति।

तत् श्रुत्वा पन्नः विस्मितः मुन्नम् अवदत्- "अहं मूढः। मया दशैव क्रीताः। एकदशः गर्दभः कुत्र ? कृपया वद।" मुन्नः प्रहस्य अवदत् - "त्वम् एकम् आरूढः। नव तम् अनुसरन्ति। मया दृष्टः गर्दभोऽन्यः गर्दभारूढः। स एकादशः किल?" इति।

पन्नः स्तब्धः। मुन्नेन उक्तम् न अजानात्।

பன்னா ஆச்சரியத்துடன் "நான் ஒரு முட்டாள் நான் பத்து கழுதைகள் தான் வாங்கினேன். அந்த பதினோராவது கழுதை எங்கே காட்டு" என முன்னாவிடம் கேட்டான். முன்னா உறக்க சிரித்தபடி "நீ ஒரு கழுதையின் மேல் இருக்கிறாய். ஒன்பது கழுதைகள் உன்னைத் தொடர்ந்து வருகின்றன. நான் பார்த்த அந்த பதினோராவது ஒரு கழுதையின் மீது அமர்ந்திருக்கிறது. அவனும் ஒரு கழுதை இல்லையா!..." என்றான். பன்னா கூறியது அவனுக்கு புரியவில்லை.

4. शिक्षणं संपूर्णम्

नीतिपालो नाम कश्चन राजा कनकपुरं परिपालयति स्म। सः अतीव गुणवान् न्यायनिष्ठः प्रजापालनकुशलः ईश्वरभक्तश्च। आदर्शभूतो राजा इति तस्य कीर्तिः सर्वत्र प्रसृता । सर्वे जना अपि सन्तुष्टा आसन् । परं तस्य अपत्यं न जातमिति एकमेव दुःखमासीत्। अतः पुत्रलब्ध्यर्थं राजा बहुधा ईश्वरमाराधयामास, राज्ञ्या सह बहूनि व्रतानि क्षेत्राटनानि च यथाशास्त्रम् आचरत् । तस्य प्रार्थनायाः फलम् अन्ततो लब्धम्। नातिचिरात् शुभे दिने तस्य अरोगः पुत्रो जातः। गुणनिधिः इति नाम तस्य राजा चकार। अतीव सन्तुष्टा राज्ञी पुत्रं वात्सल्येन पोषयामास। राज्ञः परिजनाः नगरस्थाः जनाश्च हृष्टा बभूवुः।

गुणनिधिः शैशवदशामत्यगात्। विद्याध्ययनाय कालः समापन्नः इति मत्वा राजा पुत्रं गुरुकुले शिक्षायै कस्यचित् विद्यानिधेः समीपं प्रेषितवान्। राजकुमारः पितरौ नत्वा महर्षिणा सह प्रस्थितवान्।

कतिचन वत्सरा गताः। गुणनिधिः सर्वासु विद्यासु विशिष्य अर्थशास्त्रे युद्धशास्त्रे च परं नैपुण्यम् अधिगतवान्। कलासु विदग्धः नीतिज्ञः अतिधीरो योद्धा, अतिविनीतश्च अभवत्। भाविना राज्ञा यदवश्यम् अधिगन्तव्यं, तत्सर्वं तेन विधिना अभ्यस्तम्।

"तव पुत्रः सर्वासु विद्यासु नैपुण्यं प्राप्तवान्" इति महर्षिः राजानं निवेदितवान्।

4. சரியான பயிற்சி

கனகபுரத்தை நித்திபாலா என்ற அரசன் ஆண்டு வந்தான். அவன் மிகச் சிறந்த அறிவாளியும், அன்பானவனும். மக்கள் நலன் பேணுபவனாகவும் இருந்தான். அவனுடைய புகழ் எல்லா இடங்களிலும் பரவ அவன் நல்ல ஒரு அரசனுக்கு உதாரணமாக திகழ்ந்தான். மக்கள் மிகவும் சந்தோஷமாக இருந்தனர். அவனுக்கு ஒரே ஒரு மனக்குறை. தனக்கு ஒரு மகன் இல்லையே என்ற கவலை மட்டுமே. ஒரு மகனை வேண்டி அவன் வேண்டாத கடவுள் இல்லை. அவன் ராணியுடன் சேர்ந்து பல புண்ணியஸ்தலங்களுக்கு சென்று கடவுளை வேண்டி பல வேண்டுதல்களை நிறைவேற்றினான். கடைசியில் அவன் வேண்டுதல்களுக்குப் பதில் கிடைத்தது. விரைவில் ஒரு ஆரோக்கியமான குழந்தை அவனுக்குப் பிறந்தது. மகனுக்கு குணநிதி என்று அரசன் பெயரிட்டான். ராணியும் மிகவும் மகிழ்ந்து அவனை மிகவும் பாசத்துடன் வளர்த்து வந்தாள். அரண்மனையைச் சேர்ந்த வர்கள், மற்றும் அந்நாட்டு மக்கள் அனைவரும் இதுகுறித்து மிக்க சந்தோஷம் அடைந்தனர்.

குணநிதி குழந்தைப் பருவத்தைக் கடந்தான். அரசனும் தன் மகனுக்கு நல்ல படிப்பறிவைக் கொடுக்க எண்ணி ஒரு மிகச்சிறந்த உண்மையான மகரிஷியிடம் குருகுலப் பயிற்ச்சிக்காக அனுப்பினான். இளவரசனும் பெற்றோரை வணங்கி மகரிஷியுடன் சென்றான்.

காலம் கடந்தது. குணநிதி பல பாடங்களில் நல்ல தேர்ச்சி பெற்றான். குறிப்பாக பொருளாதாரத்திலும். போர்க் கலைகளிலும் சிறந்த தேர்ச்சி பெற்றான். பல கலைகளில் சிறந்து விளங்கிய அவன் மிகத் திறமையான போராளியாகவும் ஒரு மிகத் தேர்ந்த அரசியல்வாதியாகவும், மனிதத் தன்மையும், நேர்மையும் கொண்ட சிறந்த குணவானாகவும் திகழ்ந்தான். சாஸ்திரங்களையும், பல

राज्ञः आदेशं लब्ध्वा राजकुमारं राजसभां नीतवांश्च। तत्र सांप्रदायिकाचरणानन्तरं :सदसि सर्वेषां पुरतः राजा महर्षिम् अपृच्छत् "राजकुमारस्य अपेक्षितं सर्वं शिक्षणमवसितं वा?" इति ।

महर्षिः तस्य प्रश्नस्य उत्तरमेवमदात् - "प्रभो ! अध्येतव्यं सर्वमधीतम् । परम् एकोऽल्पः भागः अवशिष्यते। स भागः अत्रैव अध्यापयितव्यः। तदर्थं भवान् सदयं मह्यमनुमतिं ददातु इति अभ्यर्थये" इति। राजा ससन्तोषम् अनुमतिं दत्तवान्।

महर्षेः अपेक्षानुसारेण एका कशा आनायिता। महर्षिस्तु राजकुमारस्य उत्तरीयं युतकं च पृष्ठतः अपसारितवान् । अवदच्च -

மொழிகளையும், போர்க்கலைகளையும் கற்ற அவன் ஒரு எதிர்கால அரசனுக்குத் தேவையான அனைத்தையும் கற்றுத் தேர்ந்தான்.

"உங்கள் மகன் எல்லாத் துறைகளிலும் மிகவும் தேர்ச்சி பெற்று விட்டான்" என்று மகரிஷி அரசனிடம் அவனை ஒப்படைத்தார்.

அரசனின் வேண்டுகோளுக்கு இணங்க அவனை அரண்மனைக்கு வரவழைத்தார். சில சடங்குகளுக்குப் பிறகு, மந்திரிகள் மற்றும் பிரதிநிதிகள் முன்பு தன் மகன் நன்றாக தேர்ச்சி பெற்றுவிட்டானா? எனக் கேட்டார் அரசர். மகரிஷி பின்வருமாறு கூறினார்.

"அரசே! என்ன சொல்லிக் கொடுக்கப்பட வேண்டுமோ அது சொல்லிக் கொடுக்கப்பட்டு விட்டது. ஒரு சிறு விஷயம் மட்டும் சொல்லிக் கொடுக்கப்பட வேண்டும். அதற்கு என்னை அனுமதிக்குமாறு உங்களை கேட்டுக் கொள்கிறேன்" என்றார். அரசன் அவருக்கு அனுமதி அளித்தான்.

மகரிஷி கேட்டுக் கொண்டதற்கு இணங்க ஒரு சாட்டை கொண்டு வரப்பட்டது. பிறகு மகரிஷி இளவரசனின் மேலாடையை கழற்றி அவனை இரு முழங்கால்களும் தரையில் படுமாறு குனிந்து இருக்கச் செய்தார். இளவரசன் அவ்வாறே செய்ய, மகரிஷி சாட்டையை எடுத்து ஐந்து முறை அவன் முதுகில் அடித்தார். சபை முழுவதும் அதிர்ச்சியாலும் ஆச்சர்யத்தாலும் உறைந்து, பிறகு எழுந்து நின்று "நிறுத்து! அவனை அடிப்பதை நிறுத்து!" என கத்தினார்கள். ஆசனங்களிலிருந்து எழுந்தவர்கள் சிலையாகி நின்றனர். ராணி துயரத்தாலும், ஆச்சர்யத்தாலும் மயங்கிச் சரிந்தாள்.

அதிர்ச்சியிலிருந்த அரசன் தன் அரியாசனத்திலிருந்து எழுந்து தன்னைத் தேற்றிக் கொண்டு கண்முருடன் மகரிஷியிடம் அவர் ஏன் இதைப் போன்ற ஒரு செயலைச் செய்தார் என விளக்கமாகக் கூறுமாறு கேட்டான். மகரிஷி இளவரசனைப் பார்த்தவாறே "மகனே, நான் காரணமில்லாமல் உனக்குக் கசையடியை

''कुमार! अवनम पुरतः। जानू स्पृश हस्ताभ्याम्'' इति।

कुमारे तथा कृतवति, महर्षिः तं कशया पञ्चषवारं पृष्ठदेशे ताडितवान् । सर्वे सदस्याः संभ्रान्ताः, ''अलं ताडनेन । अलं ताडनेन'' इत्युच्चैः आक्रोशन्। आसनादुत्थाय दण्डवत् स्थिताश्च। विस्मयेन त्रासेन चाकुला राज्ञी स्तब्धा मूर्च्छामवाप।

राजा, क्षणं स्तब्धः, आसनादुत्थितः अमर्षं शमयन् 'कुत ईदृशं कर्म कृतम्' इति सबाष्पं महर्षिं पृष्टवान्। ''स्पष्टं प्रकाशयतु'' इत्यावेदयत् । महर्षिः राजकुमारमभिमुखीकुर्वन् उवाच - ''वत्स ! नाहं निरर्थकं त्वां ताडितवान्। राजा भविष्यसि। शासनं यथानीति त्वया कर्तव्यम्। अपराधी दण्डनीयः। कदाचिदज्ञानेन निरपराधी अपि दण्ड्येत। यदि कश्चित् निरपराधी त्वया दण्ड्येत, तदा तस्य दण्डस्य प्रत्याघातः दण्डितस्य चेतसि कीदृशः स्यात् इति त्वया ज्ञातव्यं किल ?'' इति ।

राजा सभागताः राजकुमारश्च सर्वे विस्मयेन स्तब्धाः तूष्णीमासन् क्षणम्। न्यायपरायणो राजा नीतिपालः- ''इदमेव साक्षात् अनुशासनम्। दण्ड्ये दण्डो यथा न्याय्यः तथा अनपराधिनि दण्डः सर्वत्र वर्ज्यः। अदण्ड्यो दण्डितो यदि, राज्यविप्लवो जायेताऽपि'' इति चिराय विमृशन् स्वपुत्रस्य तादृशं शिक्षणं लब्धम् इति अतीव सन्तृप्तः सन्तुष्टश्चाभवत्।

கொடுக்கவில்லை. ஒருநாள் நீயும் அரசனர்வாய். அப்போது நேர்மையாகவும், நீதி தவறாமலும் நீ நடந்து கொள்ள வேண்டி வரும். தவறு செய்பவர்கள் ஒழுக்கம் கருதி தண்டிக்கப்பட வேண்டும். சில நேரங்கள் அறியாமல் சில நிரபராதிகளும் தண்டிக்கப்படலாம். அப்படி நடக்க நேரிட்டால் அந்த வேதனை அவர்கள் மனநலனை எவ்வாறு பாதிக்கும் என்பதை நீ அறிய வேண்டும்" என்றார்.

இதைக் கேட்ட அரசன், சபையில் இருந்தவர்கள், அரசி மற்றும் அனைவரும் சில கணங்கள் மௌனமாக இருந்தனர். பிறகு உண்மையையும் நேர்மையையும் கடைபிடிக்கும் அரசன் நிதிபாலா "இதுதான் உண்மையான பயிற்சி. குற்றவாளிகள் தண்டிக்கப்படும் அதே நேரம், நிரபராதிகள் தண்டனையில் இருந்து காக்கப்பட வேண்டும் எனக் கூறி, நிரபராதிகள் தண்டிக்கப்பட்டால் நாட்டில் போராட்டம் வெடிக்கும்" என்றும் கூறினார். அரசன், மகன் தான் நினைத்தபடியே ஒரு மிகச் சிறந்த ஆசானிடம் பயிற்சி எடுத்து தேர்ச்சி பெற்றதை நினைத்து மிக மிக சந்தோஷப்பட்டான்.

5. अनन्तरगामी

राजा सोमदत्तः अमरापुरीमध्युवास। विक्रमो विजयश्च तस्य यमलौ पुत्रौ। राजा नितरां पुत्रवात्सल्येन तयोः पालनं कृतवान् । सर्वासु विद्यासु, विशिष्य धर्मशास्त्रे, युद्धनीतौ, कलासु विज्ञाने च तौ परस्परं समौ। अतः आत्मनः कालात्परं सिंहासनारोहणे राज्यपालने च को वा योग्यतरः स्यात् इति निश्चेतुं सोमदत्तो नापारयत्।

राजा प्रधानमन्त्रिणा सह सममन्त्रयत्। उचितस्तत्र मार्गो न दृष्टः। राजा चिन्ताकुलोऽभवत्।

प्रधानसचिवो बहु विचिन्त्य कमप्युपायम् अपश्यत् , राज्ञः कर्णे न्यवेदयत् उपान्ते। राजा सश्रद्धं शृण्वन् तदभ्युपपद्यत।

अन्येद्युः ताभ्यां यमजाभ्यां पुत्राभ्यां सहितः राजा मृगयायै वनमगच्छत्। चिरात् मृगयया श्रान्तं राजानं केचन चरा आगत्य न्यवेदयन् - ''अमरपुरी शत्रुभिः वलयिता, जवेन प्रत्यगत्य पुरी रक्षणीया''इति । राज्ञ आदेशेन राजकुमारौ प्रस्थितौ। राजा तु सपरिवारः प्रतिनिववृते।

राजकुमारौ किञ्चिद्दूरमेव गतवन्तौ, यावता, राजमन्दिरात् आगतः कश्चित् द्वाररक्षकः धावन्नेव तावुपसृत्य न्यवदेयत्। ''केनचित् तस्करगणेन महाराजो मन्त्रिणश्च उपरुद्धा मार्गमध्ये'' इति। राजपुत्रौ संभ्रान्तौ किं प्रथमं निर्वर्त्यं, राजरक्षणम् उत नगरीरक्षणमिति । विजयः आह - ''प्रथमं राजानं रक्षाव। समन्ततश्चोरैः अवरुद्धः स आत्मानं रक्षितुं न प्रभवेन्नाम कदाचित्।

5. அரியணை யாருக்கு?

சோமதத்தா என்ற அரசன் அமராபுரி நாட்டை ஆண்டு வந்தான். அவனுக்கு விக்ரமன், விஜயன் என்ற இரு மகன்கள் இருந்தனர். அவர்கள் இரட்டையர்கள். அரசன் அவர்களை அன்புடனும், ஆதரவுடனும் வளர்த்து வந்தான். அவர்களுக்கு எல்லாக்கலைகளும் குறிப்பாக தர்மசாஸ்திரம், மற்றும் போர் கலைகளில் சிறப்பான பயிற்சி கொடுக்கப்பட்டது. அவர்கள் இருவருமே மிகச் சிறந்த வீரர்களாகவும் நாட்டை எந்த விதமான எதிரிகளிடமிருந்தும் காப்பாற்றும் திறன் பெற்றவர்களாகவும் இருந்தனர். இதனால் சோமதத்தனுக்கு இருவரில் யார் தனக்குப் பிறகு அரியணை ஏறப் போகிறார்கள் என தீர்மானிப்பது சிரமமாக இருந்தது. அவன் இது விஷயமாக தன் மந்திரிசபையில் ஆலோசித்தும் எந்த முடிவும் எடுக்க முடியவில்லை. அதனால் அரசன் மிகவும் குழப்பமடைந்தான்.

நீண்ட நேர ஆலோசனைக்குப் பிறகு முக்கிய மந்திரி ஒரு யோசனையை மன்னரின் காதுகளில் மெதுவாக கூறினார். மன்னனும் அவர் கூறியதை உன்னிப்பாக கேட்டான்.

அடுத்த நாள் அரசன் தன் இரு மகன்களையும் அழைத்துக் கொண்டு வேட்டையாடக் காட்டுக்குச் சென்றான். இடையில் சிலர் ஓடி வந்து, வேட்டையாடிச் சோர்வாக இருந்த அரசனிடம், அமராபுரி எதிரிகளால் சூழப்பட்டு விட்டதாகவும். அவர்கள் உடனே நாட்டுக்குத் திரும்பி மக்களை காக்க வேண்டும் எனவும் கூறினர். அரசரின் ஆணைப்படி இரண்டு இளவரசர்களும் நகரத்தை நோக்கிக் கிளம்பினர். ஆயினும் அரசன் தன்னைச் சேர்ந்தவர்களுடன் அரண்மனைக்குச் சென்றான்.

இளவரசர்கள் சிறிது தூரம் சென்றதும் ஒரு அரண்மனைக் காவலாளி ஓடி வந்து, அரசரும் அவரைச் சார்ந்தவர்களும் திரும்பி வரும் வழியில் திருடர்களால் சூழப்பட்டு தாக்கப்பட்டதாக

अतस्त्वरावहे राजमन्दिरं प्रति'' इति। विक्रमः तत् न साधु मेने। 'पिता राजा शूरो विक्रान्तश्च आत्मानं रक्षितुं सर्वदा प्रभवति। तेन न नः साहाय्यं अपेक्ष्येत। नगरगताः प्रजा अशरणाः। तद्रक्षणं प्रथमं कर्तव्यम्। जना नात्मानं शत्रुभ्यो रक्षितुं प्रभवन्ति। अतः पुरीमेव गच्छाम'' इति। विजयस्तु 'नैवमहं मन्ये' इति वदन्नेव राजमन्दिरं प्रति, पितरं रक्षितुं त्वरितः प्रस्थितवान्। अहो राज्ञो मन्दिरे न कोऽपि संभ्रमः । न चोरः कोऽपि । विक्रमो नगरीं प्रविवेश। तत्र न कोऽपि शत्रुः। उभौ तौ विस्मयाकुलौ जातौ। वस्तुतः एतयोर्मध्ये सिंहासनमारोढुं को योग्यतर इति निर्णयाय मन्त्रिणा उपकल्पित उपायः।

मन्त्री संशयं विना निश्चितवान् विजय एव योग्यतरः, यतः पितरि स्नेहः

கூறினான். இதைக் கேட்ட இரு இளவரசர்களும் அதிர்ச்சி அடைந்தனர். அவர்களுக்கு, அரசரை காப்பதா? நகரத்துக்குச் சென்று மக்களைக் காப்பதா? என்று தீர்மானிப்பதில் குழப்பம் ஏற்பட்டது.

உடனே விஜயன் விக்ரமனிடம், "வா முதலில் அரசரை காப்பாற்றுவோம், திருடர்களால் சூழப்பட்டிருப்பதால் அவரால் அவரை காப்பாற்றிக் கொள்ள முடியாமல் போகலாம்" எனக் கூறினான். வா அரண்மனை நோக்கிச் செல்வோம், என அழைத்தான். விக்ரமனுக்கு அது சரியான யோசனையாகப் படவில்லை. "நமது தந்தை ஒரு மிகச் சிறந்த வீரர். அவருக்கு தன்னை காப்பாற்றிக் கொள்ளும் திறமை இருக்கிறது. ஆனால் நம் மக்களுக்கு உதவுவார் யாருமில்லை. அதனால் நாம் அவர்களைத்தான் முதலில் காப்பாற்ற வேண்டும். மக்களால் எதிரிகளிடமிருந்து தம்மை காப்பாற்றிக் கொள்ள முடியாது... அதனால் வா நகரத்தை நோக்கிச் செல்வோம்" என்றான்.

விஜயன் இதற்கு உடன்படாமல் "நான் வரவில்லை" எனக்கூறி அரண்மனை நோக்கி தன் தந்தையைக் காப்பாற்றச் சென்றான். ஆச்சர்யம்!!,, அரண்மனையில் ஒரு பிரச்சனையும் இல்லை. ஒரு திருடனைக் கூட காணவில்லை. விக்ரமன் நகரத்தை அடைந்தான். அங்கும் எந்த எதிரியும் இல்லை... எல்லாம் அமைதியாகவே இருந்தது. இருவரும் இது குறித்து மிகவும் ஆச்சரியப்பட்டனர்.

இவையாவும் உண்மையிலேயே முக்கிய மந்திரியின் யோசனை. இவர்கள் இருவரில் யார் அரசனுக்குப் பிறகு அரியணை ஏற வேண்டும் எனத் தீர்மானிக்க போடப்பட்ட திட்டம் இது.

இதன்மூலம் மந்திரி, விஜயன் தான் அரியணைக்கு ஏற்றவன் அதனால்தான் அரசனைக் காக்க ஓடோடி வந்தான். அவனுக்கு தான் அரசரின் மீது அன்பும் பாசமும் அதிகம் இருப்பதாக தீர்மானித்தார்.

अधिकः तेन प्रदर्शितः । अतः राज्ञः इष्ट उत्तराधिकारी स एव प्रभवति इति। राजानमुपगम्य स न्यवेदयत् स्वस्य निर्णयं "विजय एव यौवराज्ये अभिषेक्तव्य" इति।

राजा सोमदत्तः अन्यथा विचारितवान् - "उभावपि पितरि स्निग्धौ । तत्र न तरतमता। परं मां स्वरक्षणे प्रगल्भं निश्चित्य, राज्यस्य प्रजानाञ्च रक्षणमेव अधुना प्राप्तकालम् इति निश्चिन्वन् विक्रमः नगरीं रक्षितुं प्रवृत्तः। जनेषु तस्याधिकः स्नेहः। तेषां क्षेमं सुरक्षितत्वं चाधिकृत्यैव तस्य प्रथमा चिन्ता। अतो यौवराज्यं स एवार्हति। विक्रम एव मम अनन्तरगामी । तस्य राज्यभरणकाले सर्वे जनाः सुखिनो भवेयुरिति प्रत्येमि' इति। मन्त्री तदन्वमोदत।

அவர் அரசனிடம் சென்று விஜயனையே அரியணைக்குத் தேர்வு செய்யுமாறு கூறினார்ா.

ஆனால், அரசன் வேறு மாதிரி யோசித்தார். ”இரு இளவரசர்களுக்கும் தந்தையின் மீது அன்பிருக்கிறது. அதில் சந்தேகமில்லை. ஆனால் விக்ரமுக்கு மக்கள் மேல் அதிக அக்கரை இருக்கிறது. அதனால் தான் அவர்களை காக்க ஓடினான். விக்ரமன் மக்களிடம் மிகவும் அன்பு கொண்டிருக்கிறான். மக்களின் பாதுகாப்பு, நலன் இவைகளே அவனது முதல் குறிக்கோள். ஆகையால் அவன்தான் எனக்குப் பிறகு நாட்டை ஆளத் தகுதியானவன். அவன் இந்த அமராபுரியை ஆளும்போது... மக்கள் சந்தோஷமாகவும் நிம்மதியாகவும் இருப்பார்கள்” என்று கூறினார். மந்திரியும் இதை ஆமோதித்தார்.

6. अनुचिता स्पर्धा

कश्चन देवालयः आसीत्। तस्य पार्श्वे एव काचित् कूष्माण्डलता आसीत्। गोमयपोषणेन सा प्रतिदिनं वर्धमाना आसीत् । तस्यां बहूनि कूष्माण्डफलानि आसन्।

देवालयस्य पार्श्वे कश्चन नारिकेलवृक्षः अपि आसीत्। तस्य हरितानि पर्णानि आकाशे इतस्ततः कम्मानानि शोभन्ते स्म। वृक्षे अनेकानि नारिकेलफलानि अपि आसन्।

कदाचित् कूष्माण्डलता नारिकेलवृक्षं दृष्ट्वा अचिन्तयत्- 'एषः वृक्षः उज्ज्वलं सूर्यप्रकाशं शुद्धवायुं च सेवमानः आनन्देन तिष्ठति। अहो, भाग्यं तस्य ! अहं तु अस्मिन् मलिने स्थाने देवालयस्य उच्छिष्टपदार्थानां मध्ये जीवामि। ईश्वरः कथम् एवं निर्दयः अस्ति! सः मम विषये अन्याय्यम् आचरितवान्' इति।

तस्यां रात्रौ सा भक्त्या ईश्वरं प्रार्थयत यत् 'मामपि नारिकेलवृक्षमिव उन्नतजीवनं प्रापयतु' इति।

ईश्वरः तस्याः प्रार्थनाम् अङ्गीकृतवान्। अनन्तरदिने प्रभाते सा लता देवालयस्य गोपुरं सम्पूर्णं व्याप्य स्थिता। तद्द्वारा सूर्यप्रकाशं मन्दानिलं च अनुभवितुं सा शक्ता अभवत्। अतीव सन्तुष्टा कूष्माण्डलता ईश्वराय कृतज्ञताम् आर्पयत्।

तन्मध्ये वायुवेगः अधिकः जातः। तदा कूष्माण्डलतायाः एकं पक्वं फलं वायुवेगं सोढुम् अशक्नुवत् भूमौ पतितम्। खण्डशः भिन्नम् अपि। मध्याह्नसमये वर्धमानेन वायुवेगेन अन्यानि अपि बहूनि फलानि अधः पतित्वा भग्नानि। सायङ्कालाभ्यन्तरे प्रायः सर्वाणि फलानि पतितानि। भग्नानि च। एतेन कूष्माण्डलता नितरां शोकाकुला अभवत्।

तदा देवालयस्य व्यवस्थापकाः अपि चिन्तितवन्तः यत् श्वः एव एषा

6. தேவையற்ற பொறாமை

ஒரு கோயிலுக்கு வெளியே, சுற்று சுவருக்கு அருகில் இருக்கும் குப்பை மேட்டில் ஒரு வெள்ளரிக் கொடி இருந்தது. குப்பை மேட்டின் எரு சத்தினால் அது மிக அதிகமான காய்களுடன் பரவி வளர்ந்திருந்தது.

அதே கோயிலுக்குள் ஒரு உயர்ந்த ஒல்லியான தென்னைமரம் வளர்ந்திருந்தது. அதில் நிறைய தேங்காய்கள் காய்த்தும், அதன் இலைகள் சூரிய வெளிச்சத்தில் பளிச்சென பச்சையாகவும் இருந்தது.

ஒரு நாள் அந்த கொடி தென்னையை பார்த்து "இந்த தென்னை சந்தோஷமாக பரவும் ஓலைகனுடனும், ஓலைகள் சூரிய வெளிச்சத்தை சந்தோஷமாக அனுபவித்தும், சுத்மான காற்றை அனுபவித்தும் வருகிறது" என நினைத்தது. "கொடுத்து வைத்த மரம்" என்னைப்பார் இந்த குப்பை மேட்டில் வாழ்கிறேன். தேவையில்லாத கழிவுகளை கோயிலில் இங்குதான் கொட்டுகிறார்கள். கடவுள் ஏன் இவ்வளவு கொடியவராக இருக்கிறார். என் விஷயத்தில் மட்டும் அவருக்கு ஏன் பாரபட்சம்" என நினைத்தது.

அன்று இரவு கடவுளிடம் தனக்கும் அந்த தென்னையைப் போல ஒரு உயர்ந்த வாழ்க்கையை அளிக்குமாறு வேண்டி வணங்கி கேட்டுக் கொண்டது.

கடவுளும் அதன் பிராத்தனைக்கு செவி சாய்த்தார். அடுத்த நாள் காலை அந்த கொடி கோயிலின் மத்திய கோபுரம் முழுவதும் பரவி இருந்தது. இதன் மூலம் சூரிய வெளிச்சத்தையும் காற்றையும் சந்தோஷமாக அனுபவித்தது. மிகவும் சந்தோஷத்துடன் கடவுளுக்கு, தன் கனவு நனவானதற்கு தன் நன்றியை தெரிவித்தது.

காலை நேரம் கடந்ததும் காற்றும் சிறிது வேகமாக அடிக்க ஆரம்பித்தது. அப்போது கொடியில் இருந்து பழங்கள் ஒவ்வொன்றாக காற்றின் வேகத்தை தாங்கமுடியாமல் உயரத்தில் இருந்து கீழே விழுந்து துண்டு துண்டாக உடைந்தன. மதியம் கடந்ததும் மேலும்



कूष्माण्डलता कर्तनीया। अन्यथा देवालयं प्रदक्षिणीकुर्वतां भक्तानां कष्टं भवति इति। एतद् ज्ञात्वा कूष्माण्डलता इतोऽपि दुःखिता जाता। सा पुनरपि ईश्वरं प्रार्थयत-"प्रभो ! मया दोषः कृतः। 'अहमपि नारिकेलवृक्षः इव भवामि' इति मया यत् प्रार्थितं तत् असाधु एव । कृपया मम अपराधं क्षाम्यतु। मां यथापूर्वं करोतु" इति।

सन्तुष्टः ईश्वरः कूष्माण्डलतां यथापूर्वं कृतवान् । उक्तवान् च- "मदीयसृष्टौ जीविनां गुणाः स्वभावाश्च भिन्नाः भवन्ति। परं तेन कारणेन तेषु स्पर्धा न भवेत्। यतः सर्वेषामपि जीविनां सृष्टेः फलं जगत्कल्याणमेव" इति।

ईश्वरस्य वचनेन कूष्माण्डलता सन्तृप्ता अभवत् । सा पुनः कदापि असूयां न प्रादर्शयत्।

பழங்கள் அதிகமான காற்றின் வேகத்தை தாங்க முடியாமல் கொடியிலிருந்து பிடுங்கி எறியப்பட்டு கீழே விழுந்து உடைந்தன. மாலையானதும் கிட்டத்தட்ட அனைத்து பழங்களும் கீழே விழுந்து உடைந்து விட்டன. இதைக்கண்ட கொடி அளவுகடந்த வேதனை அடைந்தது. மேலும் அந்த கோயில் நிர்வாகி அந்த கொடியால் எற்பட்ட பாதிப்பைச் சொல்லக் கேட்டது. "இந்த கொடியை வெட்ட வேண்டும். கோயிலில் பிரதட்சணம் வரும் பக்தர்களுக்கு உடைந்த பழத் துண்டுகள் மிகவும் தொல்லை தருகின்றன" இதைக்கேட்ட கொடி மேலும் வேதனை அடைந்து, கடவுளை நோக்கி மீண்டும் பிரார்த்தனை செய்தது. " கடவுளே! நான் தவறு செய்து விட்டேன் . நான் உங்களைத் தென்னை மரத்தைப்போல என்னை ஆக்குமாறு கூறியது தவறு. என் தவறுக்கு என்னை மன்னித்து விடுங்கள். பழையபடி என்னை அந்த குப்பை மேட்டுக் கொடியாகவே ஆக்கிவிடுங்கள்" என வேண்டியது.

கடவுளும் அதன் வேண்டுதலை சந்தோஷத்துடன் ஏற்று மீண்டும் அதைத் அதன் பழைய இடத்திற்கே மாற்றினார். மேலும் என்னால் படைக்கப் பட்ட எல்லா உயிர்களும் வெவ்வேறு குணாதிசயங்களும், தன்மையும் படைத்தவை. அவைகளின் மாறுபட்ட தன்மைகளால் அவைகளுக்குள் பொறாமை ஏற்படக் கூடாது. ஏனெனில் அவர்களுக்கு தெரிந்தும் தெரியாமலும் நான் செய்பவை யாவும் அவர்களுக்கும், இந்த உலகத்திற்கும் நன்மையே. அதை மனதில் வை"என்றார்.

கடவுள் சொன்னதைக் கேட்ட கொடி மிகவும் சந்தோஷமடைந்தது. அது முதல் அந்த கொடி மற்றவர்கள் மீது ஒருபோதும் பொறாமை கொள்ளவில்லை.

7. इष्टं किमपि, सिद्धमन्यत्

दक्षिणभारते कश्चित् ग्रामः। तत्र केशवो नाम साधुः पर्णावृते कुटीरेऽवसत्। विषयेषु असंगतः, उदरपूर्तये भिक्षामटन्, लब्धेन जीवनम् अयापयत्। तस्य महती इच्छा, काशीं गच्छानि, गङ्गायां स्नानं करवाणि इति। तदर्थे भिक्षाटनात् लब्धेषु कतिचित् नाणकान् ताम्रघटे निवेशयन् ररक्ष। पूर्णे च तस्मिन्, तुष्टः काशीं प्रति प्रस्थितवान्। कथञ्चित् चिराय पद्भ्यां चरन् काशीं प्राप। महती तुष्टिः तस्य यत् चिराय ईप्सितं लब्धमिति।

गङ्गायां स्नातुं गतः, नाणकपूरितं ताम्रघटं निधातुम् स्थलं पर्यैक्षत। 'यदि कश्चित् चोरो घटमपहरेत्। तर्हि मया किं करणीयम्' इति। चिराय चिन्तयन् आस्त तत्रैव। ग्रीष्मे नदी कृशा प्रावहत्। सैकतपुलिनं विस्तृतमासीत्। सैकते एकं सुषिरं खनित्वा तस्मिन् घटं गुप्तं निवेश्य उपरि सैकतभरणेन प्रच्छन्नं कृतवान्। पुनः सन्देहो जातः तस्य मनासि- 'सर्वं सैकतमयम्। कुत्र गुप्तमिति यदि ज्ञातुं न शक्यते ?' चिराय चिन्तयन् जलसिक्ताभिः सिकताभिः शिवलिङ्गमेकं पिण्डीकृत्य प्रच्छादिते देशे संस्थाप्य, संपूज्य, चिन्तारहितः प्रवाहुमुपागतः सम्यक् सन्ध्यादिकमाचरच्च।

अत्रान्तरे तीर्थयात्रार्थे आगताः सर्वे - "एवमेव यात्रिकैः कर्तव्यम्। पुलिने सिकतया शिवलिङ्गं विधाय, तत् संपूज्यैव गङ्गायां स्नातव्यम्। अत एव एष एवमाचरत्' इति चिन्तयन्तः तत्र तत्र उपविष्टाः शिवलिङ्गानि विधाय पूजयित्वा स्नानाय जग्मुः।

स्नानादि समाप्य तीरमागतः केशवः सर्वत्र शिवलिङ्गशतं पूजितं

7. சிவலிங்கம்

தென்னிந்தியாவின் ஒரு கிராமத்தில் ஓலைக்கூரை வேய்ந்த ஒரு குடிசையில் கேசவா என்கிற ஞானி வாழ்ந்து வந்தான். அவன் உலக இன்பங்களில் பற்றில்லாதவனாக இருந்தான், சாப்பாட்டிற்காக வீடுவீடாகப் பிச்சை எடுக்கும் வழக்கத்தைக் கொண்டிருந்தான். மேலும், கிடைத்ததை வைத்துத் தன் வாழ்க்கையை ஓட்டினான். காசிக்குச் சென்று கங்கை நதியில் முழுக்குப் போட அவனுள் ஒரு பெரிய ஆசை இருந்தது. அதற்காக தனக்குக் கிடைக்கும் காசுகளை ஒரு செப்புப் பாத்திரத்தில் போட்டு வைத்திருப்பான்.' அந்தப் பாத்திரத்தில் காசுகள் நிரம்பியதும், அவன் காசிக்குப் புறப்பட்டான். நிறைய நாட்கள் கால் நடையா்க நடந்துச் சென்று, ஒரு வழியாகக் கெடவுளின் நகரத்தைச் சென்றடைந்தான். தன்னுடைய வெகுநாள் ஆசை இவ்வாறாகப் பூர்த்தியானதில் அவன் மிகவும் மகிழ்ச்சியடைந்தான்.

நதியில் குளிக்கப் போகும் முன் செப்புப் பாத்திரத்தை வைக்க இடத்தை தேடினான். பாத்திரம் நிற்றைய இருக்கும் காசுகளைத் திருடன் எவனாவது திருடும் சந்தர்ப்பம் இருப்பதை நினைத்து கவலையுற்றான். அவன் வெகு நேரம் யோசனையில் மூழ்கினான். வெய்யில் காலத்தில் நதியில் இருக்கும் தண்முர் மிகவும் குறைவு. உலர்ந்த மணல் பகுதி அதிகம். நதியின் மணல் கரையில் குழி தோண்டி, செப்புப் பாத்திரத்தை அதில் புதைத்து அதை மண் போட்டு மூடினான். பிறகு நதியை நோக்கி சென்றான். சிறிது தூரம் நடந்தவுடன், அவன் மனதில் ஒரு சந்தேகம் தோன்றியது. இங்குள்ள எல்லா இடமும் ஒரே மணலாக உள்ளது. பாத்திரம் புதைத்த இடத்தை எவ்வாறு கண்டுபிடிப்பது? அதிக நேரம் யோசித்தபின், ஈரமணலை எடுத்து ஒரு சிவலிங்கம் செய்தான். அதைப் பாத்திரம் புதைத்த இடத்தில் பிரதிஷ்டை செய்தான். வணங்கினான். எந்தவிதப்

ददर्श। स्वीयं शिवलिङ्गं तज्ज्ञाप्यं तदधःस्थं ताम्रघटं वा चिरायान्विष्यन्नपि नाभिज्ञातुं प्राभवत्। शिवलिङ्गस्य एकैकस्य ध्वंसनेनैव तदधः कलशो विद्यते वा इति ज्ञातुं शक्यम्। तत्तु महत् दुष्कृतं दृश्येत। निर्विण्णः आत्मनः दुःस्थितिं जानन् एवं प्रललाप-

गतानुगतिको लोको न लोकः पारमार्थिकः ।
तीरे सैकतलिङ्गेन नष्टं मे ताम्रभाजनम् ।। इति

ப்ரபரப்பும் இல்லாமல் கங்கா நதியில் நீராடினான். சாதாரணமாகச் செய்யும் சந்தியா வந்தனம் போன்றவற்றைச் செய்தான்.

இதற்கிடையில் அங்கு வந்த யாத்ரிகர்கள் எல்லாரும் சிவலிங்கத்தைக் கண்டனர். கங்கையில் குளிக்கும் முன், ஈர மணலில் இந்த மாதிரி சிவலிங்கம் செய்து, மணல் கரையில் பிரதிஷ்டை செய்து, வணங்கி பிறகு குளிக்கறும் என்று எண்ணி, தாங்களும் அவ்வாறு செய்ய வேண்டுமென்று நினைத்தனர். அதனால் அவர்கள் ஆங்காங்கே அமர்ந்து, சிவலிங்கங்கள் செய்து வணங்கி நதியில் குளிக்கச் சென்றனர்.

குளித்து முடித்து நதியின் கரைக்கு வந்த கேசவா, நிறைய சிவலிங்கங்கள் பிரதிஷ்டை பண்ணியிருப்பதையும் பூஜை செய்திருப்பதையும் பார்த்தான். வெகுவாகத் தேடியும் தன்னுடைய சிவலிங்கத்தைக் கண்டுபிடிக்க முடியாததைப் பார்த்தான். அதனால் அவனுக்கு அவனுடைய செப்புப் பாத்திரமும் கிடைக்காமல் போனது. ஒவ்வொரு சிவலிங்கமாக அப்புறப்படுத்தினால்தான், பாத்திரம் அடியில் புதைக்கப்பட்டிருக்கிறதா இல்லையா என்று ஒருவன் கண்டுபிடிக்க முடியும். அப்படிச் செய்வது மிகவும் மோசமான காரியமாகக் கருதப்படும். வெறுப்படைந்தவள் தன்னுடைய அதிர்ஷ்டமின்மையை உணர்ந்து வருந்திறுள்.

“இந்த உலகத்தில் மனிதர்கள் அடுத்தவர்களைப் பார்த்து எதுவும் செய்கிறார்கள். யாரும் உண்மையாக இல்லை. ஈரமண்ணில் செய்த சிவலிங்கத்தினால் என்னுடைய செப்புப் பாத்திரம் என்னை விட்டுப் போனது”.

8. भवितव्यता बलवती

तिलकपुरी नाम नगरी। तत्र भरतो नाम कश्चन अरोगो युवा भार्यया समं निवसति स्म। स निर्धनः कुटुम्बं दुःखेन पालयति स्म। जीविकायै कापि वृत्तिर्न लब्धा। कदाचित् तस्य पत्नी तमब्रवीत् - "नाथ! अद्यावधि वृत्तिर्न लब्धेति भवान् अतिदुःखम् अनुभवति। परं गृहान्तरेव कालं नयति। कथं वृत्तिः लब्धुं शक्यते ? अतो बहिः गत्वा वृत्त्यन्वेषणं करोतु।" पत्नीवचनानुसारेण भरतो गृहात् निर्गतवान्।

किञ्चिद्दूरं गतः, मार्गमध्ये वृक्षस्याधः उपविष्टं कञ्चित् संन्यासिनम् अपश्यत्। स्वसमीपमागतं तं संन्यासी अपृच्छत्- "त्वम् अतीव दुःखी भासि। किं ते दुःखस्य कारणम्? वक्तुं शक्यं वा?" इति। भरतः तस्मै वृत्तेरलाभं स्वदुःखहेतुम् अकथयत्।

मुनिः क्षणं रोमन्थयन् तम् उवाच- "वत्स, त्वया त्रीणि कार्याणि कर्तव्यानि। एकं - यः तव साहाय्यं याचते, आवश्यकं तदनुपदं कुरु। द्वितीयं - त्वया धनं लभ्यते, पत्न्यै दद्याः। मा वद कथं लब्धं धनमिति। तृतीयं राजा यदि पृच्छति, सर्वं वृत्तं तस्मै परमार्थतः कथयेः" इति। भरतस्तु तथैव करोमीति वाग्दानं कृत्वा गतवान्।

मार्गे गच्छन् किं कर्तव्यम् इति अजानः दूरं जगाम। अत्रान्तरे मार्गे नितरां शोकमग्नान् चतुरो वणिजः अपश्यत्। तेऽतीव दुःखिताः, यतः तान् अनुगच्छन् तेषां सुहृदेकः दिवं गतः। मृतस्य तस्य देहस्य संस्करणाय सर्वथा अपरिचिते देशे न लब्धः कोऽपि अनुकूलो मार्गदर्शी। मुनेर्वचः स्मरन् भरतः स्वयमेव मृतदेहं क्षालयितुं प्रवृत्तः। तस्मिन्नयस्तभरास्ते ततः अपाक्रामन्।

8. விதி

முன்னொரு காலத்தில் திலகபுரி என்ற நகரத்தில் பரதா என்கிற ஆரோக்கியமான இளைஞன் ஒருவன் தன் மனைவியுடன் வசித்தான். அவன் மிகவும் ஏழை. மிகவும் கஷ்டப்பட்டு ஜீவனம் நடத்தி வந்தான். அவனுக்கு ஒரு வேலையும் கிடைக்கவில்லை. அவன் மனைவி ஒருநாள் அவனிடம் சொன்னாள், "உங்களுக்கு இதுவரை வேலை கிடைக் கவில்லையென்று நீங்கள் வருத்தப்படுகிறீர்கள். நாள் முழுவதும் வீட்டுக்குள்ளேயே முடங்கி கிடந்தால் எப்படி வேலை கிடைக்கும். அதனால் வெளியில் சென்று வேலை தேடுங்கள்" அவளின் ஆலோசனையின் படி பரதா வீட்டை விட்டு கிளம்பினான்.

போகும் வழியில் அவன், மரத்தடியில் ஒரு சந்நியாசி அமர்ந்திருப்பதைப் பார்த்தான். அவரின் அருகே சென்று மரியாதையுடன் அவர் காலைத் தொட்டு வணங்கினான். "நீ ரொம்ப வருத்தமாகக் காணப்படுகிறேயே மனிதா ஏன்ன காரணம் என்று என்னிடம் சொல்வாயா?" என்று அவனிடம் சந்நியாசி கேட்டார். தன் குடும்பத்தைப் பராமரிக்க தனக்கு ஒரு வேலை கிடைக்கவில்லை அதுதான் தன்னுடைய துயரத்திற்கு காரணம் என்று பரதா அவரிடம் சொன்னான். சிறிது நேரம் தியானித்து விட்டு சந்நிாயசி அவனிடம், "நீ மூன்று காரியங்கள் செய்ய வேண்டும்" என்று சொன்னார்.

1. உன்னிடம் யாராவது உதவி கேட்டு அனுகினால், உன்னால் முடிந்தவரை நேர்மையாக அந்த நபருக்கு உதவிட ஒப்புக் கொள்ள வேண்டும்.
2. உனக்கு பணம் கிடைக்கும் போது, அதை உன் மனைவியிடம் கொடுத்து வை. ஆனால் எப்படிக் கிடைத்தது என்று மட்டும் சொல்லாதே.
3. அரசன் ஏதாவது விசாரித்தால், அவனிடம் எல்லாவற்றையும் உண்மையாக சொல்லி விடு என்றான். பரதா அவரிடம் நான்



एकाकी कथञ्चित् देहं परिवर्तयन् वस्त्रमपसारयन्, वस्त्रकोटौ स्वर्णनाणकानि निबद्धान्यपश्यत्। तानि स्वर्णनाणकानि पृथक् रक्षित्वा, मृतसंस्कारानन्तरं गृहं गतः पत्न्यै दत्तवान्। सा विस्मिता सन्तुष्टा 'कथमिदं धनं लब्धम्' इत्यपृच्छत्। मुनेः द्वितीयम् उपदेशं स्मरन् ''मया खानिते कूपे मृत्तिकाभिः छादितानि एतानि उपलब्धानि'' इत्यवोचत्।

'भरतेन कूपात् स्वर्णनाणकानि लब्धानि' इति वार्ता सद्यः सर्वत्र प्रससार, राजगृहेऽपि। महाराजो भरतमाहूय पुनः कूपखननाय तं चोदयामास। भरतस्तु मुनेस्तृतीयम् उपदेशं स्मरन् राज्ञे वृत्तं सर्वमुक्तवान्। राजा तस्य सत्यवचनेन तुष्टः, तं राजमन्दिरे द्वारपालकतया नियुक्तवान्।

நீங்கள் சொல்லியபடியே நிச்சயமாக நடந்து கொள்வேன் என்று கூறி அங்கிருந்து சென்றான்.

என்ன செய்வதென்று அறியாமல், அவன் வெகு தூரம் சென்றான். போகும் வழியில், தங்களுடன் வந்தவர்களில் ஒருவன் எதிர்பாராமல் இறந்ததைப் பற்றி கவலைப்பட்டுக் கொண்டிந்த நான்கு வியாபாரிகளைக் கண்டான். முன்பின் தெரியாத இடத்தில் எப்படி உடலை எரிப்பது அதற்கு எவ்வாறு உதவி பெறுவது, என்று அவர்கள் குழம்பிக் கொண்டிருந்தனர். பரதா உடனே சந்நியாசி தனக்கு கூறியவற்றை நினைவு கூர்ந்து அவர்களுக்கு உதவ ஒப்புக் கொண்டான். இறந்த உடலை எரிப்பதற்காக தயார் பண்ணி உடலை கழுவினான். மற்ற வியாபாரிகள் தங்கள் பொறுப்பு (சுமை) நீங்கியது என்று அவ்விடத்தை விட்டு அகன்றனர். தங்கக் காசுகள் கொண்ட பை ஒன்று அந்த உடலில் ஆடையின் நுனியில் கட்டியிருப்பதைக் கண்ட பரதா தான் ஒருவனாகவே எப்படியோ ஆடையை செத்த உடலிலிருந்து கழட்டினான். காசுகளைச் சேகரித்து உடலை எரித்து விட்டு, வீட்டுக்கு சென்று மனைவியிடம் காசுகளை கொடுத்தான். ஆச்சரியப்பட்டுப் போன மனைவி சந்தோஷமாக அவனிடம் எவ்வாறு இந்த் காசுகள் கிடைத்தன என்று கேட்டாள். சந்நியாசி கூறிய இரண்டாவது அறிவுரையை நினைவு கூர்ந்து அவன் சொன்னான், கிணறு தோண்டும்போது பூமிக்கடியில் கிடைத்தது.

விரைவில் பரதாவுக்கு கிணற்றிலிந்து தங்கக் காசுகள் கிடைத்த விஷயம் எல்லா இடத்திற்கும் பரவியது. அது அரண்மனையையும் அடைந்தது. அதனால் அரசன் பரதாவை கூப்பிட்டு நிறைய கிணறுகளை தோண்ட உத்தரவிட்டான். ஆனால் சந்நியாசி கூறிய மூன்றாவது அறிவுரைய்யை நினைவு கூர்ந்து, பரதா எல்லா உண்மைகளையும் அரசனிடம் கூறினான். அவனின் நேர்மையான பேச்சைக் கேட்ட அரசன் மிகவும் மகிழ்ந்தான். மேலும் பரிசளிக்கும் விதமாக அவனை அரண்மனைக் காவலனாக நியமித்தான்.

ஒரு தடவை அரண்மனைக் காவலனாகத் தன் கடமையைச் செய்யும் போது, ராணி ஒரு வீரனோடு சல்லாபித்துக்

राजगृहं परिरक्षता तेन, केनचित् सैनिकेन सह प्रेमलीलायां व्यापृता राज्ञी दृष्टा। भरतः आश्चर्यचकितोऽभवत्। आत्मनः नीचां प्रवृत्तिं भरतो दृष्टवान् इति अवगम्य, भीता राज्ञी सुदर्शना तस्य शिरच्छेदं साध्वमन्यत। स्वपरिचारिकया वध्यस्थानाधिकृतं प्रति वार्तां प्रेषयामास - 'परेद्युः प्रथमतया यः त्वामुपगच्छति, विना विचारं तस्य शिरः छेदय' इति । भरतं स्वान्तिकमानीय- 'परेद्युः प्रातः त्वया वध्यस्थानाधिकृतः द्रष्टव्यो मन्निदेशेन। स उचितं विधास्यति' इति आदिशत्।

विधिः अन्यथा अचिन्तयत् इव। परेद्युः भरतः चिरं सुष्वाप। ततः राज्ञ्या आज्ञापालने विलम्बः कृतः। परं विधिप्रेरित इव, सुदर्शनायाः कामी स राज्ञः सैनिकः यदृच्छया वधाधिकृतस्य स्थानमगच्छत्। सन्देशमनुतिष्ठन् घातुकः तस्य शिरः अच्छिनत् ।

सर्वमेतत् राज्ञ श्रवणं प्राप। नगरे वार्तैषा सर्वत्र प्रसारिता। राज्ञ्या गूढं दुश्चरितं राज्ञा ज्ञातम्। भरतः यथादृष्टं सर्वं तस्मै अकथयत्। राजा विस्मयाकुलः भग्नविश्वासः विरक्तः क्षणाद्बभूव। दुश्चरितस्य सैनिकस्य राज्ञीकामुकस्य मरणं, निष्पापस्य भरतस्य मरणादकस्मात् निवृत्तिः, सर्वमेतत् दैवनियुक्तमेव इति चिन्तयन् राज्ञ्या नगराद्विवासनं, भरतस्य पदोन्नतिं पुरस्कारं च दत्तवान्। भरतः पत्न्या सह मोदमानः सुखमजीवत्।

கொண்டிருப்பதை அவன் காண நேர்ந்தது. அதைக் கண்டதும் அதிர்ச்சியடைந்தான். தன்னுடைய ஈனச் செயலை அரண்மனை காவலன் பரதா பார்த்து விட்டதை தெரிந்து கொண்ட ராணி, தன் நலனுக்காக அவனை ஒழித்துக் கட்ட முடிவு செய்தாள். அடுத்த நாள் காலையில் கொஞ்சம் கூட தயங்காமல் தனக்கு எதிரே வரும் முதல் நபரின் தலையை வெட்டி எறியுமாறு, தலையாரிக்கு தன் வேலைக்கார பெண் மூலம் சொல்லியனுப்பினாள். பிறகு அவள் பரதாவைக் கூப்பிட்டு, “நாளை விடியற்காலை அரண்மனை தலையாரியிடம் போய் ஒரு தகவல் சொல்ல வேண்டும் அவன் அதன்படி நடந்துக் கொள்வான்” என்று உத்தரவிட்டாள்.

ஆனால் விதி வேறு மாதிரியாக விளையாடியது. தற்செயலாக பரதா அடுத்த நாள் காலையில் அதிக நேரம் தூங்கியதால் ராணியின் உத்தரவை நிறைவேற்ற தாமதமாகி விட்டது. விதியின் விளையாட்டால், சுதர்ஸனாவின் நண்பனான அரண்மனை வீரன் ஏதோ ஒரு காரியமாக தலையாரியிடம் போக நேர்ந்தது. ராணியின் உத்திரவின்படி, தலையாரி சிறிதும் தாமதிக்காமல் வீரனின் தலையை வெட்டினான்.

இவையெல்லாம் அரசனின் காதுகளுக்கு எட்டின. இந்த விஷயம் ஊர் முழுவதும் பரவியது. இவ்வாறாக அரசனுக்கு ராணியின் ரகசியக் காதல் தொடர்பு தெரிய வந்தது. அரசன் மிகவும் அதிர்ச்சியடைந்து, எல்லா நம்பிக்கைகளையும் இழந்து, சிறிதுகாலம் எதிலும் பற்றில்லாமல் இருந்தான். ராணியின் காதலன் இறந்தது அவனுடைய தவறினால் என்றும் நிரபராதியான பரதா சாவின் பிடியிலிருந்து தப்பியது தெய்வச்செயல் என்றும் புரிந்து கொண்டான் அரசன். ராணியை நகரத்தை விட்டு வெளியேற்றினான். பரதாவுக்கு பதவி உயர்வும், வெகுமதிகளும் கொடுத்தான். பரதா அதற்குப் பிறகு எப்பொழுதும் தன் மனைவியோடு மகிழ்ச்சியாக வாழ்ந்து வந்தான்.

9. परिणयपरिधानम्

ममता एकस्मिन् प्रख्याते कुटुम्बे जाता। तस्याः पिता मुरलीधरः कस्यचित् नृपवंश्यस्य प्रभोः बन्धुः स्वयं धनिकश्च। तस्य गृहे सेवायै परःशताः भृत्याः। तेषु कस्याश्चित्परिचारिकायाः पुत्री अमिता। ममता अमिता च समानवयस्के। बाल्यात्प्रभृति सुहृदौ सह वसतः स्म। तयोर्मध्ये स्वामिनी परिचारिकेति भेदः कदापि नानुभूतः। ममता आत्मना धृतानि वस्त्राणि, उपयुक्तानि च क्रीडनकानि तस्यै वयस्यायै प्रीता अददात्। अमितयाऽपि तानि सामोदं स्वीकृतानि। अमिताया माता तस्यै न किमपि नूतनं वस्त्रं क्रीतवती। तथापि अमिता रञ्जकानि वस्त्राणि नात्युपयुक्तानि धृतवती तोषमवाप। ममतया सह सदा निवसन्ती, तया सह क्रीडन्ती सुखेन कालम् अयापयत्।

अचिरादेव ते बालिके कौमारमतीत्य यौवने पदं निहितवत्यौ। ममतापेक्षया अमिता अमितसुन्दरी जाता। ततःपरम् आत्मनो यौवनं सौन्दर्यं च अभिज्ञातवती, मनसि कमपि खेदमवहत्। 'ममतापेक्षया अहं सुन्दरी। परं ममतया उपयुक्तचराण्येव वस्त्राणि धारयामि। न कदापि नूतनानि। किमहं नूतनस्य वस्तुन उपभोगाय नार्हा ?' इति चिन्ता दिने दिनेऽवर्धत। मन्युश्च उद्भूतः 'कुतो मह्यं उपभुक्तपूर्वमेव सा ददाति ? कुतो न नूतनम्?'

'सा प्रभुः स्वामिनी, अहं भृत्यपुत्री। कथं समाना भवेयम् ?' इति न कदापि चिन्तितवती। तस्या विषादं तोषं वा अनादृत्यैव महान् कालोऽपयातः।

9. கல்யாண உடை

மமதா ஒரு ராஜ பரம்பரையைச் சேர்ந்தவள். அவளுடைய தந்தை முரளிதரா ஒரு முன்னாள் அரசனின் உறவினன். அவனும் ஒரு பணக்காரன்தான். அவர்களிடம் நிறைய வேலைக்காரர்கள் இருந்தனர். அந்த வேலைக்காரர்களில் ஒருவனின் மகள் அமிதா. மமதாவும் அமிதாவும் கிட்டத்தட்ட ஒரே வயதை ஒத்தவர்களாக இருந்தனர். மேலும் அவர்கள் எஜமானி, வேலைக்காரி மாதிரியல்லாமல் நண்பர்களாகப் பழகினார்கள் என்று சொல்லலாம். அவர்களிடையே எந்த வித்தியாசமும் எதுவும் தென்படவில்லை. மமதா தான் சிறிது காலம் உபயோகித்த உடைகளையும், விளையாட்டு பொருட்களையும் (பொம்மைகளை) மகிழ்ச்சியுடன் அமிதாவுக்குக் கொடுத்தாள். அமிதாவும் அவற்றை சந்தோஷத்தோடு பெற்று வந்தாள். அமிதாவின் தாய் அவளுக்கென்று புதுஉடை என்றுமே வாங்கியதில்லை. இருந்த போதிலும் அமிதா அதிகம் உபயோகப்படுத் தப்படாத ஆடைகளை அணிந்து மகிழ்ச்சியடைந்தாள். அவளின் வாழ்க்கைத் தரத்தை எண்ணும் போது அவள் ஆடம்பர வாழ்க்கையே வாழ்ந்தாள். அமிதா தன்னுடைய வாழ்க்கையை சந்தோஷமாக மமதாவுடன் இருப்பதிலும் விளையாடுவதிலும் கழித்தாள்.

சில வருடங்களுக்குப் பிறகு இரண்டு சிறுமியர்களும் குழந்தைப் பருவத்தை கடந்து யுவதிகளாக வளர்ந்தனர். மமதாவை விட அமிதா மிகவும் அழகாக இருந்தாள். தனக்கு அழகும் இளமையும் இருந்தும், அடுத்தவர் உபயோகித்த உடைகளே கிடைப்பதை எண்ணி அவள் மனதில் வருத்தம் தோன்றியது. அவள் எண்ணுவாள் "நான் மமதாவை விட அழகாக இருக்கிறேன். எனக்கு புது உடைகள் அணியத் தகுதி இல்லையா?" இந்த மாதிரி எண்ணங்கள் அவள் மனதில் கொஞ்சம் கொஞ்சமாக விஸ்வரூபம் எடுக்க ஆரம்பித்தது. நான் ஏன் மமதா உபயோகித்த பழைய ஆடைகளையே அணிய

विवाहयोग्यं वयः इति चिन्तयन्तौ ममतायाः पितरौ रमेशनामकेन अनुरूपेण वरेण सह ममताया विवाहं निश्चितवन्तौ। तथैव अमिताया अपि कश्चन वरो निर्णीतः ममतायाः पितृभ्याम्। ममताया विवाहदिनादनन्तरे दिने अपि तस्या विवाहो निश्चितः।

ममतायाः कृते सर्वं वैवाहिकं मण्डनं, बहुमूल्यं परिणयपरिधानं च क्रीतम्। अमितायै अपि ततोऽपि किञ्चिदूनमूल्यं परिधानं विवाहकालिकपारितोषिकतया दत्तम् । अमिता अतीव सन्तुष्टा यत् इदानीमेव इदंप्रथमतया नूतनं वस्त्रं तदर्थे क्रीतं दत्तञ्च । प्रथमं नूतनं वस्त्रम् इति स्पृष्ट्वा स्पृष्ट्वा महान्तमानन्दमन्वभवत्। सद्यः तद्वस्त्रं धृतवती इतस्ततश्चचार। अतीव सुन्दरी सा अदृश्यत।

ममताया विवाहदिनात् पूर्वेद्युः सायं समयः। अमिता नूतनवस्त्रधरा कस्मिंश्चित् रजतभाजने मिष्टं भक्ष्यजातमादाय आगतेभ्यः बन्धुभ्यः सुहृद्भ्यश्च व्यतरत्। सर्वे तां दृष्ट्वा तस्यांः सौन्दर्येणाकृष्टा अभवन्। क्रमेण सा ममतायाः भविष्यत्पतेः वासकोष्ठं प्राविशत्। तस्मा अपि मिष्टभक्ष्यवितरणव्याजेन तस्य मनोऽपाहरत् । तस्याः सौन्दर्येणाकृष्टः स रमेशः परिसरमविचिन्त्यैव, तामपैक्षत तेन सह कञ्चित्कालं यापयितुम्। सा तन्मनोगतं सम्यक् जानती तस्यापेक्षामङ्गीकृतवती। रमेशः अमिताया जाले अपतदेव।

परेद्युः ममताया विवाहः सम्यक् संपन्नः । रात्रौ पत्युः शयनागारं प्रविशन्ती ममता स्वेन तस्मिन् दिने धृतं परिणयपरिधानम् अमितायै यथापूर्वं प्रीत्या ददौ। अमिता तु विनयेन तत्स्वीकृतवती धन्यां मन्यमानां अवोचत्- "प्रियसखि! अनुगृहीतास्मि, यत् विवाहानन्तरमपि यथापूर्वं

வேண்டும்? ஏன் புது ஆடைகள் கூடாது? எனக்கு மட்டும் புதிய ஆடைகளைத் தராமல் பழைய ஆடைகளை தருகிறார்கள்? தனக்கு ஏன் இப்படி நடக்கிறது என்று அவளுக்கு புரியவில்லை சில சமயங்களில் தன் தாயிடம் புது ஆடைகள் வேண்டுமென்று வற்புறுத்தியிருக்கிறாள். தான் மமதாவின் அம்மாவிடம் வேலை பார்க்கும் ஒரு வேலைக்காரியின் மகள் என்பதும், அதனால் தான் எப்போதும் அவளுக்கு சமமாக ஆக முடியாது என்கிற உண்மையும் அவளுக்குப் புரியவில்லை. அவள் மிகவும் வேதனைப்பட்டாள். ஆனால் இதுதான் நடைமுறை வழக்கமாக இருந்தது. மேலும் எல்லாக் காரியங்களும் அவளுடைய புலம்பல்களை பொருட்படுத்தாமல் இதே மாதிரி தான் நடந்தது.

மமதாவின் கல்யாணத்திற்கு எல்லா ஏற்பாடுகளும் அலங்கார வேலைப்பாடுகளும் செய்யப்பட்டன. மிக விலை உயர்ந்த கல்யாண உடை வாங்கப்பட்டது. அமிதாவுக்கு சிறிது குறைந்த விலையில் புது உடை கல்யாணப்பரிசாக கொடுக்கப்பட்டது. முதல் தடவையாக தனக்கு புது உடை வாங்கி கொடுக்கப்பட்டதில் அமிதாவுக்கு அளவில்லா ஆனந்தம். தன்னுடைய முதல் புது உடையை தொட்டும் தடவிப் பார்த்தும் பரவசம் அடைந்தாள். அந்த உடையை உடனே அணிந்து அங்கும் இங்கும் சந்தோஷமாகத் திரிந்தாள். அந்த உடையில் அவள் மிக அழகாக தோன்றினாள்.

மமதாவின் கல்யாணத்திற்கு முதல் நாள் சாயந்திரம் அமிதா தன்னுடைய புது உடையை அணிந்து, அந்த ஆடையினால் அதிக அழகாக தோன்றி, வந்திருந்த நண்பர்கள், உறவினர்களுக்கெல்லாம் இனிப்புகளை ஒரு வெள்ளித்தட்டில் வைத்து வழங்கிக் கொண்டு இருந்தாள். அனைவருமே அவளைப் பார்த்ததும் அவளுடைய அழகால் கவரப்பட்டார்கள். முகத்தை மறைத்து கொண்ட வேலைக்காரியை போல எந்தவித பரபரப்பும் இல்லாமல் மமதாவின் மணமகன் இருந்த அறைக்குள் நுழைந்தாள். அங்கேயும் இனிப்புகள் வழங்கும் சாக்கில் அவன் உள்ளத்தை கவர்ந்தாள். சூழ்நிலையை

परिणयकाले धृतं नूतनं परिधानं दत्तवती त्वम्। परं तुभ्यं दातुं न किञ्चिदस्ति मे वशे ! परम् अद्य रात्रौ शयनागारे, मया उपभुक्तपूर्वं किमपि ते नूतनं वस्तु त्वदर्थे मया सज्जीकृतं वर्तते। अद्यैवाहमनृणा, यत् त्वं यथा व्यवहृतवती मया सह, तथैवाहमपि त्वया सह व्यवहृतवती । धन्यास्मि । अद्यैव कृतकृत्यास्मि'' इति वदन्ती एव किं तदिति पृच्छन्तीं सखीमनादृत्यैव ततोऽपाक्रामत।

अमर्षो मर्यादामुप्यल्लङ्घयितुं प्रचोदयति ।

மறந்து அவள் அழகால் கவரப்பட்டு, ரமேஷா அவளைத் தன்னுடன் சிறிது நேரம் கழிக்குமாறு கேட்டுக் கொண்டான். அவன் எண்ணத்தை நன்றாகப் புரிந்து கொண்டு அவள் உடனே சம்மதித்தாள். ரமேஷா அவளுடைய கவர்ச்சி வலையில் விழுந்தான்.

அடுத்த நாள் மமதாவின் கல்யாணம் மிகச் சிறப்பாக நடந்தது. அன்று இரவு தன்னுடைய கணவனின் படுக்கையறைக்கு நுழைந்து தன் கணவனை முதன் முதலாக தனியாகச் சந்திக்கும் முன், அன்று காலை தான் அணிந்த கல்யாண உடையை வழக்கம் போல் சந்தோஷமாக அமிதாவுக்கு கொடுத்தாள். அமிதா அந்த உடையை தலை குனிந்து பெற்று பின் நிமிர்ந்து நின்று சொன்னாள், ரொம்ப நன்றி சகோதரியே! கல்யாணம் ஆகியும் வழக்கம் போல் நீ உபயோகித்த உடையை கொடுத்திருக்கிறாய். ஆனால் உனக்குத் திருப்பித்தர என்னிடம் பழைய அணிந்த உடை இல்லை. இருந்தாலும் உன்னுடைய படுக்கையறையில் இன்று இரவு நான் ஏற்கனவே உபயோகித்த ஒன்றை உனக்காக புதிதாக வைத்திருக்கிறேன். இன்றுதான் நீ என்னிடம் நடந்து கொண்ட மாதிரி நான் உன்னிடம் நடந்து கொண்டு உன் கடனிலிருந்து விடுபட்டேன். இன்றுதான் எனக்கு நிம்மதியாச்சு, என்று சொல்லி, தன்னிடம் கேள்விகள் கேட்கும் தோழியைப் பற்றி கவலைப்படாமல் வெளி நடந்தாள். பொறாமை யாரையும் எல்லைகளைத் தாண்ட வைக்கிறது.

10. ताना रीरी च

अकबरचक्रवर्तिनः आस्थाने तोडरमल्लः, बीरबलः, तानसेनः इत्यादयः विद्वांसः आसन् । तानसेनः अद्वितीयः गायकः । कदाचित् अकबरस्य पत्नी महाराज्ञी तानसेनम् उक्तवती- "भवान् आगामिदीपावलीरात्रौ दीपकरागगानेन राजभवने दीपान् ज्वालयतु " इति। परन्तु तानसेनः एतत् विनयेन निराकृतवान्। यतः सः जानाति स्म यत् दीपकरागालापनेन स्वशरीरं नितराम् उष्णं भवति, तेन कदाचित् मरणमपि सम्भाव्यते' इति। एतद् ज्ञात्वा महाराज्ञी अपि पुनः अनुरोधं न कृतवती।

अथ कदाचित् मथुरायां निवसतः तानसेनस्य गुरोः हरिदासवर्यस्य मरणम् अभवत् । तानसेनः झटिति मथुरां गतवान् । तत्र गुरोः वासस्थलं गत्वा दीपकरागालापनेन तस्य चितां ज्वालितवान् । अकबरचक्रवर्ती अपि सपत्नीकः तत्र गत्वा अन्त्यक्रियासु भागं गृहीतवान् । ततः सर्वे आग्रानगरं प्रत्यागताः ।

अचिरादेव तानसेनः रुग्णः जातः । दीपकरागालापनेन तस्य शरीरे उत्पन्ना उष्णता न शान्ता एव। तस्याः उपशमनार्थम् एकः उपायः यत् अन्येन केनचित् अत्यन्तमेधाविना सङ्गीतज्ञेन गीयमानं मल्हाररागालापनं श्रोतव्यम्। परन्तु तानसेनसदृशः गायकः न कोऽपि अन्यः आसीत्। अतः मार्गान्तरम् अपश्यन् तानसेनः राजवैद्यानां सूचनानुसारं तीर्थयात्रार्थं प्रस्थितवान्। अकबरः अमजदखाननामकं रक्षापुरुषं सैन्यसहितं तस्य साहाय्यार्थं प्रेषितवान्।

तैः बहूनि तीर्थक्षेत्राणि दृष्टानि । अन्ते गुजराते कस्मिंश्चित् ग्रामे

UNIVERSITY LIBRARY ... ACCESSION NO 23847
DATE 13/12/06

10. தானா - ரிரி

ஆக்ராவிலுள்ள பேரரசர் அக்பரின் அரச சபையில் பல திறமையுள்ள மந்திரிகளும், படித்தவர்களும் இருந்தனர். அவர்களில் தோடர் மால், பீர்பால் மற்றும் தான்சென் ஆகியோரும் இருந்தனர். தான்சென் ஒரு ஈடு இணையற்ற பாடகர்.

ஒரு தடவை ராணியாகிய அக்பரின் மனைவி தான்சென்னிடம் கூறினாள், "வரும் தீபாவளி அன்று இரவு தீபக் ராகம் பாடி அரண்மனை விளக்குகளை ஏற்றுங்கள்" என நல்ல கச்சேரியை ரசிப்பவர்களில் ராணியும் ஒருத்தி.

ஆனால் தான்சென் அடக்கத்துடன் மறுத்தார். ஏனென்றால், தீபக் ராகத்தை விரிவாக ஆலாபனை செய்தால் தன் உடம்பு அதிக உஷ்ணமடைவதுடன் தனக்கு மரணமும் நேரிடும் என்று அவருக்குத் தெரியும். இதையறிந்த ராணி இந்த விவகாரத்தை வற்புறுத்தாமல் விட்டு விட்டாள்.

சில நாட்களுக்குப் பின், மதுராவில் வசித்து வந்த தான்செனின் குரு ஸ்ரீ ஹரிதாஸ் மரணமடைந்தார். உடனே தான்சென் மதுராவில் உள்ள தன் ஆசானின் இருப்பிடத்துக்கு சென்றார். அவரது சிதைக்கு தீபக் ராகம் பாடி தீ மூட்டினார். சங்கீத ரசிகரும் குரு ஹரிதாஸ் மீது மிகுந்த மரியாதை உடையவருமான பேரரசர் அக்பர் தன் ராணியுடன் இறுதிச் சடங்குகளில் கலந்து கொண்டார். பிறகு எல்லோரும் ஆக்ரா நகருக்குத் திரும்பினர்.

தீபக் ராகம் பாடிய காரணத்தினால் தான்சென் விரைவில் நோய்வாய்ப்பட்டார். உடலின் உஷ்ணம் குறைவதாக இல்லை. உஷ்ணத்தை தணிக்க ஒரே ஒரு வழிதான் உள்ளது. சம தகுதியுள்ள ஒரு சங்கீத வித்வான் மலஹர் ராகம் பாட வேண்டும் என்பதுதான் அது. அதைக் கேட்பதுதான் "தீபக்" ராகத்தினால் உண்டான உஷ்ணம் தணியும். ஆனால் தான்சென்னுக்கு நிகரான

नदीतीरे शिबिरं कृत्वा ते कतिचन दिनानि यापितवन्तः। अत्रान्तरे एतां वार्तां ज्ञात्वा ग्रामाधिकारी काञ्चनलालः तानसेनस्य दर्शनाय आगतवान्। सः तानसेनस्य अस्वास्थ्यस्य कारणं ज्ञात्वा तम् उक्तवान् - 'श्रीमान्! मम यमले पुत्र्यौ स्तः- ताना रीरी चेति। ताभ्यां सुदीर्घः सङ्गीताभ्यासः कृतः अस्ति। अहं तयोः मल्हाररागालापनस्य व्यवस्थां कारयामि। किन्तु तयोः काचित् प्रतिज्ञा अस्ति यत् ते ग्रामदेवतायाः समक्षमेव गायतः, न तु अन्यत्र। अतः भवता एव तत्र आगन्तव्यं भवति' इति।

तानसेनः तद् अङ्गीकृतवान्। ग्रामदेवतायाः पुरतः तयोः सङ्गीतकार्यक्रमः व्यवस्थापितः। ताना-रीरीभ्यां मल्हाररागालापनम् आरब्धम्। तयोः रागशुद्धिं स्वरमाधुर्यं गीतस्य श्रुतिमनोहारित्वं च ज्ञात्वा तानसेनः नितरां विस्मितः जातः। गीतसमाप्तिसमये धारासारैः महती वृष्टिः जाता। तानसेनस्य अस्वास्थ्यमपि द्रुतमेव अपगतम्। अत्यन्तं संतुष्टः

சங்கீதவித்வான் யாருமில்லை. வேறு வழி தெரியாமல். அரசாங்க வைத்தியர்களின் அறிவுரைப்படி தான்சென் தீர்த்த யாத்திரை சென்றார். புண்ணிய தலங்களைச் சுற்றி வருவதாலும், புதிய சூழ்நிலைகளும் உடல் உபாதைகளை குறைக்க உதவும் என்பதாக அறிவுரை சொல்லப்பட்டது. அக்பர் தான்சென்னின் பாதுகாப்பிற்காகவும் உதவிக்காகவும், அம்ஜத்கான் என்கிற அரண்மனைக் காவலனை வீரர்களுடன் துணைக்கு அனுப்பினார்.

அவர்கள் நிறைய தலங்களுக்கும், கோவில்களுக்கும் சென்றனர். கடைசியாக குஜராத்தில் நதிக்கரையிலுள்ள ஒரு கிராமத்தில் சில நாட்கள் தங்கினர்.

இதற்கிடையில் கிராமத்தவர்கள் மூலம் விஷயம் அறிய வந்த காஞ்சன்லால் என்கிற கிராமத்தலைவன் தான்செனனை சந்திக்க வந்தான். அவரின் உடல்நலம் பற்றி விசாரித்தான். தான்சென்னின் நிலைமையைப் புரிந்து கொண்ட அவன் கூறினான், "ஐயா! எனக்கு தானா. ரிரி என்று இரண்டு இரட்டைப் பெண் குழந்தைகள் உள்ளனர். அவர்களுக்கு வெகுநாட்களாக சாஸ்திரிய சங்கீதம் கற்றுக் கொடுக்கப்பட்டுள்ளது. அவர்களால் முடிந்த வரையில் மலஹர் ராகத்தை பாட ஏற்பாடு செய்கிறேன். ஆனால் அவர்கள் கிராமத்து தெய்வம் முன் தவிர மற்ற இடத்தில் பாடுவதில்லை என்று சபதம் செய்துள்ளனர். ஆதலால் தாங்கள் கிராமத்திலுள்ள கோவிலுக்கு வரவேண்டும்".

தான்சென் கிராமக் கோவிலுக்கு செல்ல ஒப்புக் கொண்டார். சங்கீத கச்சேரிக்கு ஏற்பாடு செய்யப்பட்டது. தனானாவும் ரினாவும் மலஹர் ராகத்தை விலாவாரியாக பாடினார். அவர்களின் இனிய குரலையும், சுத்த ராகத்தையும், சரியான லயத்தையும் கேட்ட தான்சென் வாயடைத்துப் போனார். அவர்களின் கச்சேரியை வெகுவாகப் பாராட்டினார். ஆலாபனை முடிவில் கடும் மழை பெய்தது. உடனே தான்சென் நோயிலிருந்து குணமானார். அவர்

तानसेनः चक्रवर्तिनः अकबरस्य नाम्ना ताना-रीरीभ्यां बहूनि उपायनानि दत्तवान् । परन्तु काञ्चनलालः तानि विनयेन निराकृतवान्।

ततः आग्रानगरं प्रत्यागतः तानसेनः प्रवृत्तं सर्वम् अकबरं निवेदितवान् । तन्मध्ये अमजदखानः 'काञ्चनलालः अकबरस्य नाम्ना दत्तानि उपायनानि निराकृतवान्' इत्यापि उक्तवान्। तद् श्रुत्वा अकबरः नितरां क्रुद्धः अभवत् । पूर्वापरम् अनालोच्य सः झटिति अमजदखानम् आदिष्टवान् - "विना विलम्बं ते बालिके अत्र आनीय तयोः सङ्गीतकार्यक्रमम् आयोजयतु" इति ।

"परंतु ते ग्रामदेवतायाः समक्षमेव गायतः, न तु अन्यत्र । अतः तयोः अत्र आनयनप्रयासः व्यर्थः" इति तानसेनः बहुवारं निवेदितवान् । परन्तु क्रोधान्धः अकवरः तद् न श्रुतवान् एव ।

झटिति एव अमजदखानः प्रस्थितः। सः तं ग्रामं प्राप्य सर्वं काञ्चनलालं निवेदितवान् । ग्रामीणाः सर्वे एतां वार्तां श्रुत्वा किङ्कर्तव्यतामूढाः जाताः। चक्रवर्तिनः कृतघ्नतां ज्ञात्वा रोषाकुलाश्च जाताः। "श्वः प्रातः एव माया सह पुत्रीभ्यां सह भवता आग्रानगरं प्रति प्रस्थातव्यम्" इति काञ्चनलालं कठोरं सूचितवान् अमजदखानः । ताना रीरी च नितराम् उद्विग्ने जाते । प्रतिज्ञाभङ्गं कर्तुं कथमपि ते न सन्नद्धे।

महता कष्टेन एव सा रात्रिः अतीता । प्रातः यदा अमजदखानः आग्रागमनाय उपस्थितः, तदा 'तानारीरी च कुत्रापि न दृश्येते' इति वार्ता प्राप्ता । जनाः तयोः अन्वेषणार्थं सर्वत्र गताः । अन्ते च ग्रामात् बहिः स्थिते कूपे तयोः शरीरे दृष्टे । काञ्चनलालः दुःखसागरे निमग्नः जातः ।

अमजदखानः रिक्तहस्ततया आग्रां गत्वा प्रवृत्तं सर्वं राजसभाया

மிகுந்த சந்தோஷமடைந்தார். மேலும் பேரரசர் அகப்ரின் பேரால் நிறைய பரிசுகளை தானாவுக்கும் ரிரிக்கும் அளித்தார். ஆனால் காஞ்சன்லால் மிகுந்த பவ்யத்துடன் அவற்றை வாங்க மறுத்தான்.

அக்பரின் சபைக்கு திரும்பிய தான்சென், நடந்த எல்லாவற்றையும், தனது காஞ்சன்லால் மற்றும் மற்றும் அவனது மகள்களால் தன் உயிர் எவ்வாறு காப்பாற்றப்பட்டது என்பதையும் அரசருக்கு விவரித்தான். அப்பொழுது, நன்றியுடன் அரசரின் பேரால் தான்சென் அளித்த பரிசுகளை காஞ்சன்லால் வாங்க மறுத்ததை, அம்ஜத்கான் சுட்டிக் காட்டினான். அதைக் கேட்டு வெகுவாக ஆத்திரமடைந்த அக்பர், அம்ஜத்கான் உடனடியாக சற்றும் சிந்திக்காமல், அந்த இரண்டு சிறுமிகளையும் அவர்களின் தந்தையையும் கொண்டு வந்து அரசவையில் பாடச் செய்யும்படி உத்தரவிட்டான். கிராமத்தெய்வம் தவிர மற்ற இடங்களில் அவர்களால் பாட முடியாது என்று தான்செ்ன் எவ்வளவோ மன்றாடி சொன்னான். ஆனால் அவையனைத்தும் வீணாயின. ஆனால் மேலும் இதனால் ஆத்திரமடைந்து அரசன் அவர்களை எப்படியும் தன் சபைக்கு கொண்டு வர தீர்மானித்தான்.

அதனால் அம்ஜத்கான் உடனே கிராமத்திற்கு புறப்பட்டு சென்று, அங்கு காஞ்சன்லாலிடம் அரசரின் ஆணையை கூறினான். அரசரின் ஆணையை கேட்ட காஞ்சன்லாலும் மற்ற கிராம மக்களும் செய்வதறியாது தவித்தனர். அரசரின் நன்றியில்லாத செய்கையும் தான் தோன்றித்தனமான உத்தரவும் அவர்களை ஆத்திரம் அடைய செய்தது. அடுத்த நாள் காலையில் தன் மகள்களுடன் ஆக்ராவுக்கு கிளம்ப வெண்டுமென்று, காஞ்சன்லாலுக்கு அம்ஜத்கான் கண்டிப்புடன் கூறினான். இவற்றை கேள்விப்பட்ட தானாவும், ரிரியும் மிகுந்த வருத்தமுற்றனர். எந்த காரணத்திற்காகவும் தாங்கள் எடுத்த சபதத்தை மீற அவர்கள் தயாராக இல்லை.

निवेदितवान् । अकबरः पश्चात्तापदग्धः अभवत् । सः काञ्चनलालम् आनाय्य तस्य क्षमां प्रार्थितवान् । परन्तु तानसेनः 'एतस्य दुरन्तस्य अहमेव कारणीभूतः' इति नितरां चिन्ताकुलः जातः । ततः सः निश्चयं कृतवान् यत् 'अहं तयोः बालिकयोः नाम शाश्वतं यथा स्यात् तथा करिष्यामि । इतः परं प्रत्येकं रागस्य अलापनसमये 'ताना-रीरी' इति आलापनं करिष्यामि' इति। सः तथैव आचरितवान् अपि ।

अतः एव अद्यापि सङ्गीतज्ञाः गीतगानात् पूर्वं 'ताना-रीरी' इति आलापनं कुर्वन्ति ।

இரவு மிகுந்த பரபரப்புடனும் சிரமத்துடனும் கழிந்தது. அடுத்த நாள் காலையில் அம்ஜத்கான் கிராமத்தை விட்டுக் கிளம்பத் தயாரான போது, தானா - ரிரியைக் காணவில்லை என்கிற செய்தி வந்தது. மக்கள் 'அவர்களை எல்லா இடங்களிலும் தேடிப் பார்த்தனர். இறுதியாக கிராமத்திற்கு வெளியிலுள்ள ஒரு கிணற்றில் அவர்களின் சடலங்கள் கண்டுபிடிக்கப்பட்டன. காஞ்சன்லால் சொல்லொண்ணுத் துயரத்தில் ஆழ்ந்தான்.

அம்ஜத்கான் வெறும் கையுடன் ஆக்ரா திரும்பி அரச சபையில் நடந்த துயரச் சம்பவத்தை விவரித்தான். அக்பர், வளரும் இரு உயிர்கள் துயரமான முடிவு அடைவதற்குத் தன்னுடைய யோசிக்காத அதிகார துஷ்பிரயோகம் காரணமானதை நினைத்து வருந்தினார். காஞ்சன்லாலை சபைக்கு அழைத்து மன்னிக்கும்படி வேண்டினான். ஆனால் தான்சென்னோ இந்த துயர சம்பவத்திற்கு தான் தான் காரணம் என்கிற எண்ணத்தோடு மிகுந்த மன உளைச்சல் அடைந்தார். ஆதலால், அந்த இரு சிறுமியர்களின் பெயர்களை எப்பொழுதும் நினைவிலிருக்கும்படி ஏதாவது செய்யத் தீர்மானித்தான். "இனிமேல் எப்பொழுதெல்லாம் ஒரு ராகம் விலாவாரியாகத் தனியாக பாடப்படுகிறதோ, தானா-ரிரி என்கிற இரண்டு வார்த்தைகளை ஆலாபனையின் போது நான் உபயோகப்படுத்துவேன் என்று தனக்குள் கூறிக் கொண்டான். அதையே எப்பொழுதும் கடைபிடித்தான்".

அதனால் தான் இன்றும் கூட எல்லா சங்கீத வித்வான்களும், ஒரு பாடலை ராகத்தோடு பாடும் முன், ஆலாபனையில் சாமர்த்தியமாக தானா-ரிரியை கலந்து, அந்த ராகத்தின் முழு அழகையும் வெளிப்படுத்துகிறார்கள்.

11. प्रतीक्षा

वानान्तप्रदेशे एकस्यां गुहायां रामदासःनाम कश्चित् वृद्धः वसतिस्म। शैशंवे एव तस्य मातापितरौ दिवङ्गतौ। न कोऽपि बन्धुजनः तस्य आसीत्। बाल्यकालात् सः एकस्मिन् अनाथाश्रमे इतरबालैः सह कस्याचित् महर्षेः रक्षणे प्रवृद्धः आसीत्। अतः एव बहून् सद्गुणान् प्राप्तवान् आसीत्।

परोपकारे आसक्तः सः धर्मशीलः ईश्वरभक्तश्च। धर्माचरणेन एव तस्य आयुः व्यतीतम्। पापमार्गे चलतः बहून् जानान् सः धर्ममार्गम् आनीतवान् आसीत् । अतः वार्धक्यकाले तस्य मनसि एवं विचारः आगतः - 'अहं सद्गुणसम्पन्नः एव । प्रतिदिनं मया दीनानां दुःखितानां च साहाय्यं कृतम् । मम मनसि काचिदपि पापचिन्ता कदापि न आगता । अतः मम स्वर्गप्राप्तिः भविष्यति एव । ईश्वरः मां सशरीरं स्वर्गं नेष्यति। सः मां नेतुम् कश्चित् देवदूतम् अत्र प्रेषयिष्यति' इति । इदृशेन दृढविश्वासेन सः प्रतिदिनं गुहायाः बहिः उपविश्य देवदूतस्य आगमनं प्रतीक्षमाणः आसीत् ।

अथ एकस्मिन् दिने सायङ्काले कश्चित् देवदूतः रामदासस्य पुरतः प्रत्यक्षीभूतः एव । सन्तोषेण स्तम्भितः रामदासः तम् आनन्दातिरेकेण सत्कृतवान् । 'मम प्रार्थनानुसारेण भगवान् देवदूतं प्रेषितवान्' इति अहङ्कारः अपि तस्य मनसि आगतः।

देवदूतः एतत् सर्वं ज्ञात्वा कौतुकेन अचिन्तयत् 'रामदासः विनयशीलः। परन्तु तस्मिन् विनयेन सह अहङ्कारः अपि अस्ति' इति ।

सः रामदासम् उक्तवान् - "मित्र ! अहं विश्रामाय भूमिम् आगतः अस्मि । परितः प्रदेशदर्शनं कर्तुम् इच्छामि" इति ।

11. நீண்ட காத்திருத்தல்

முன்னொரு நாள் ஒரு காட்டினுள்ளே ராமதாஸ் என்கிற வயதானவன் தனிமையில் வசித்து வந்தான். அவன் குழந்தை பருவத்திலேயே பெற்றோர்களை இழந்தான். உறவினர்கள் என்று யாரும் கிடையாது. அதனால் நல்ல தெய்வ பக்தியுள்ள நல்லவரின் பராமரிப்பில் மற்ற பையன்களோடு ஒரு அனாதை ஆசிரமத்தில் வள்ர்க்கப்பட்டான். அன்பு, அடுத்தவர்களுக்கு உதவுதல், கடவுள் நம்பிக்கை போன்ற நல்ல பழக்கங்களை அங்கு அவன் கற்றான். சிறிய வயதிலேயே அவனுள் ஊறிப் போன அந்த நல்ல பழக்க வழக்கங்கள், பிற்காலத்தில் அன்புடனிருத்தல் அடுத்தவர்களுக்கு உதவுவதல், முடிந்த போதெல்லாம் நல்லது செய்தல் போன்ற வாழ்க்கையை வாழ உதவியது. திருடர்கள் போன்று தவறு செய்பவர்களையும், தாங்களாகவே திருந்தி நல்ல வாழ்க்கைக்கு அவர்களை மாற்றுவதில் திற்மைசாலியாக இருந்தான். என்னிடம் நல்ல பழக்கங்கள் குடிகொண்டுள்ளன. கெட்ட எண்ணங்கள் கிடையாது. தினமும் நகரத்திற்குள் சென்று வியாதியஸ்தர்களுக்கும், ஏழைகளுக்கும் உதவுகிறேன, உண்மையைதான் பேசுகிறேன். அதனால் சுவர்க்கம் தான் போவேன். கடவுள் நிச்சயமாக அழைத்துச் செல்ல தூதுவனை அனுப்புவார் என்று தன் வயதான காலத்தில் தனக்குத் தானே சொல்லிக் கொள்வான். இந்த எண்ணங்களோடு கடவுளின் தூதுவன் வருகைக்காக அவனுடைய குகையின் வாசலில் காத்திருப்பான்.

பிறகு ஒரு சாயங்கால வேளையில் திடீரென்று அவன் முன்னால் ஒரு தேவதை தோன்றினாள். தன்னை சுவர்க்கத்திற்கு அழைத்து செல்வதற்காக வந்த கடவுளின் தூதன் என்று முடிவு செய்தான். அதனால் மிகுந்த சந்தோஷத்துடன் தேவதையை தனிமை விரும்பி வரவேற்றான். தன் பிரார்த்தனைக்கு செவி சாய்த்து தேவதையை அனுப்பிய கடவுளுக்கு நன்றி கூறினான். அதைக் கேட்ட தேவதைக்கு வியப்பாக இருந்தது. மேலும் தனிமை

तदनुसारेण रामदासः परेद्यवि प्रभाते एव देवदूतेन सह समीपस्थं नगरं गन्तुं सज्जः अभवत् । नगरे वसतां दीनानां दरिद्राणां च सेवा तस्य नित्यक्रमः एव आसीत् ।

यदा नगरं प्राप्तं तदा एव देवदूतः उक्तवान् - ''मित्र नितरां बुभुक्षितः अस्मि । भोजनम् आवश्यकम्'' इति ।

रामदासः तं कस्यचित् परिचितस्य धनिकस्य गृहं नीतवान् । धनिकः तौ सादरं सत्कृतवान् । शीघ्रमेव विशिष्टं पाकं सज्जीकृत्य भोजनाय आहूतवान् । भोजनपदार्थाः सुवर्णपात्रेषु रजतपात्रेषु च परिविष्टाः आसन् । तौ आनन्देन भोजनं कृतवन्तौ । भोजनानन्तरं गृहात् निर्गमनसमये देवदूतः एकं सुवर्णपात्रं स्वीकृत्य स्वस्य कोषे निक्षिप्तवान् । रामदासः एतद् दृष्ट्वा कुपितः जातः । तथापि तद् न दृष्टमिव व्यवहृतवान् ।

अनन्तरं तौ नगरे अटितवन्तौ । मध्याह्ने अटनात् पिपासितः भूत्वा

விரும்பியிடம் எவ்வளவு சுயகர்வம் இருக்கிறது என்று எண்ணியது. ராமதாஸ் மரியாதையான சாதாரணமானவனாக இருந்தாலும், அந்த மரியாதைக்கு பின்னால் சுயகர்வம் இருப்பதாக எண்ணியது. "நான் சிறது ஓய்வு எடுப்பதற்காக பூமிக்கு வந்துள்ளேன்". பக்கத்திலிருக்கும் சில இடங்களை பார்வையிட ஆசைப்படுகிறேன் என்று ராமதாஸிடம் தேவதை கூறியது. அதற்காக நகரத்திற்கு தேவதையுடன் அடுத்த நாள் காலையில் செல்லத் தயாரானான். நகரத்திற்குச் சென்று ஏழைக்கும், தேவைப்படுபவர்களுக்கு உதவுவதும் த்னிமை விரும்பியின் தினசரி வேலையாக இருந்தது.

அவர்கள் நகரத்திற்குள் நுழைந்ததும் தேவதைக்கு பசியெடுத்ததால், உணவை விரும்பியது. ஆகையால் வெகு நாட்களாகத் தனக்குத் தெரிந்த பணக்காரன் ஒருவன் வீட்டிற்கு தேவதையை அழைத்துச் சென்றான். அவர்கள் இருவரையும் முகமலர்ச்சியோடு பணக்காரன் வரவேற்று, தன்னுடன் உணவருந்த அழைத்தான். பிரத்யேக உணவுகள் தயாரிக்கப்பட்டு, தங்கப் பாத்திரங்களிலும், வெள்ளித் தட்டுகளிலும் பரிமாறப்பட்டது. சாப்பிட்டு முடிந்து பணக்காரரின் வீட்டை விட்டு கிளம்பும் முன், ஒரு தங்கப் பாத்திரத்தை தேவதை திருடி தன் ஜேபியில் திருட்டுத்தனமாக ஒளித்துக் கொண்டது. அதைப் பார்த்த ராமதாஸ் கோபம் அ்டைந்தான். ஆனால் அந்த நேரத்தில் அதைப் பார்க்காத மாதிரி நடந்துக் கொண்டான்.

பிறகு மதியத்தில் நகரைச் சுற்றிப் பார்த்ததில் தேவதைக்கு தாகமாக இருந்ததால் குடிக்கத் தண்ணீர் வேண்டியிருந்தது. ராமதாஸ் பக்கத்திலிருந்த வீட்டுக்கு அழைத்துச் சென்றான். அது ஒரு கஞ்சனுடைய வீடு. வெகுநேரத்திற்குப் பிறகு கதவை திறந்த வீட்டுக்காரன் அவர்களுக்கு என்ன வேண்டுமென்று கேட்டான். அவர்களின் தாகத்தைப் பற்றி கேட்டவுடனே, அவன் "எங்களிடம் தண்ணீர் நிறைய இல்லை. வறட்சியால் எங்கும் தண்ணீர்க் கஷ்டம் உள்ளது. எங்களுடைய தினசரி தேவைகளுக்கே போதவில்லை. மேலும் எங்களுக்கும் ரொம்ப தாகமாக உள்ளது" என்று

देवदूतः पानाय जलम् अपेक्षितवान्। तदा रामदासः तं समीपस्थम् अन्यत् गृहं नीतवान् ।

तत् गृहं कस्यचित् कृपणस्य आसीत् । तौ यदा द्वारे शब्दं कृतवन्तौ किञ्चित् विलम्बेन गृहस्वामी द्वारम् उद्घाटितवान् । सः तौ कोपेन एव पश्यन् आगमनोद्देशम् अपृच्छत् । "कृपया किञ्चित् जलं ददातु" इति रामदासस्य वचनं श्रुत्वा सः अवदत् - "मम गृहेऽपि अधिकं जलं नास्ति। अनावृष्टिकारणात् अधुना सर्वत्र जलाभावः अस्ति" इति ।

एतत् वचनं श्रुत्वा रामदासः भग्नाशः जातः । तथापि सः पुनः पुनः प्रार्थनां कृतवान् । अन्ते च सः गृहस्वामी अनिच्छया एव लघुपात्रे अल्पमात्रं जलं तयोः कृते दत्तवान् । तौ सन्तोषेण जलं पीतवन्तौ ।

ततः प्रस्थानसमये देवदूतः धनिकस्य गृहात् अपहृतं सुवर्णपात्रं कृपणस्य पात्रस्य समीपे स्थापितवान् । एतत् दृष्ट्वा रामदासः विस्मयाकुलः सन् 'किमस्ति तस्य मनसि' इति गाढं चिन्तयन् आसीत् । 'किम् एषः देवदूतः विश्वासयोग्यः?' इत्यपि सन्देहः तस्य मनसि उत्पन्नः। परन्तु सः। मौनेन स्थितवान् ।

सायङ्काले तौ गुहां प्रति प्रस्थितवन्तौ। मार्गमध्ये राजमन्दिरमिव विशालं किञ्चित् भवनं दृष्टवन्तौ। भवनस्य अन्तर्भागः दीपप्रभया प्रकाशमानः आसीत्। तत्र बहवः जनाः सङ्गीते, नाट्ये च निरताः आसन्।

तत् दृष्ट्वा देवदूतः रामदासं पृष्टवान् - "तत्कस्य गृहम्? तत्र कः विशेषः? " इति ।

रामदासः उक्तवान् - "एतत् कस्यचित् महाधनिकस्य गृहम् । सः बहुकालम् अनपत्यः आसीत्। सन्तानलाभाय तौ दम्पती बहूनि व्रतानि

சொன்னான். இதைக் கேட்ட ராமதாஸ் மிகவும் வருத்தமடைந்தான். வெகுநேரம் ராமதாஸ் மன்றாடிக் கேட்டுக் கொண்டதினால், வீட்டுக்காரன் மனமில்லாமல் இரண்டு மண் பாத்திரத்தில் கொஞ்சம் தண்முர் அவர்களுக்கு கொடுத்தான். அவர்கள் மகிழ்ச்சியுடன் தண்முரைப் பருகினர். அந்த வீட்டிலிருந்து கிளம்பும் முன், மற்றவர்களுக்கு தெரியாமல் பணக்காரன் வீட்டிலிருந்து திருடிய தங்க பாத்திரத்தை அந்த இரண்டு மண் பாத்திரங்களுக்கு அருகாமையில் தேவதை வைத்தது. தனிமை விரும்பியான ராமதாஸ் தேவதையின் செய்கையைப் பார்த்து ஆச்சரியப்பட்டான். தேவதையின் மனதில் இருப்பது புரியவில்லை. தேவதையை நம்பலாமா என்ற சந்தேகமும் எழுந்தது. ஆனால் திரும்பவும் அவன் மௌனமாக இருந்தான்.

மாலையில் அவர்கள் குகைக்கு திரும்பிக் கொண்டிருந்தனர். வழியில் அரண்மனை போன்ற ஒரு பெரிய வீட்டைக் கண்டனர். அந்த வீட்டில் நன்றாக விளக்கேற்றப்பட்டிருந்தது. அந்த வீட்டில் சங்கீதம் நடனம் போன்றவைகளை நடத்திக் கொண்டு நிறைய நபர்கள் அங்கும் இங்கும் நடந்து கொண்டிருந்தனர். தேவதையின் பார்வை அந்த வீட்டின் மேல் விழுந்தது. தனிமை விரும்பியிடம் என்ன நடக்கிறது என்று விசாரித்தது. “ஒரு பெரிய பணக்காரன் தன் மனைவியோடு அந்த வீட்டில் வசித்து வருகிறான். அவர்களுக்குத் திருமணமாகிப் பல வருடங்கள் ஆகியும் புத்திர பாக்கியம் இல்லை. தீர்த்த யாத்திரை போகுதல், இறைவனிடம் ஈடுபாட்டுடன் வேண்டுதல், தர்ம காரியங்கள் செய்தல் போன்ற பல நல்ல காரியங்களைச் செய்திருக்கிறார்கள். கடைசியில் அவர்களுக்கு ஒரு பையன் பிறந்தான். இன்று அந்த பையனின் முதலாவது பிறந்தநாள். அதனால்தான் இந்த கொண்டாட்டங்கள் நடக்கின்றன” என்று ராமதாஸ் கூறினான். ராமதாஸ் கூறியதைக் கேட்ட தேவதை, நாம் ஏன் அங்குச் சென்று குழந்தையை ஆசிர்வதிக்கக் கூடாது என்று கேட்டது. அதன்படி அவர்கள் அந்த வீட்டினுள் நுழைந்தனர். பணக்காரன் தன் மனைவியோடு சேர்ந்து அவர்களை மிகுந்த

आचरितवन्तौ । अन्ते च गते वर्षे तयोः एकः पुत्रः जातः। तस्य शिशोः प्रथमं जन्मदिनम् अद्य आचरन्तः सन्ति'' इति ।

एवं चेत् आवाम् अपि तत्र गत्वा शिशुम् आशिषा सम्भावयावः'' इति देवदूतः अनुरोधं कृतवान्।

तदनुसारेण तौ धनिकस्य भवनं गतवन्तौ । गृहस्वामी सपत्नीकः तयोः सत्कारं कृतवान् । तदनन्तरं तौ अन्तः गत्वा दोलायां निद्रितवन्तं शिशुं दृष्टवन्तौ । अन्ये गृहजनाः सर्वे उत्सवे मग्नाः आसन् । न कश्चिदपि दोलायाः पार्श्वे आसीत् । देवदूतः आशीर्वादकरणच्छलेन शिशोः समीपं प्राप्य अन्यदर्शनं विना तस्य कण्ठं निष्पीड्य श्वासं निरुध्य शिशुं मारितवान् । रामदासः देवदूतस्य ईदृशम् अकार्यं दृष्ट्वा रोषाकुलः अभवत् । किन्तु तत्समये मौनमेव अवलम्बितवान् । ततः शीघ्रं तौ गुहां प्रति प्रस्थितौ ।

गुहां प्राप्य रामदासः कोपेन देवदूतम् अपृच्छत् - "अहो भवान् देवदूतः अस्ति । अतः भवान् सत्पुरुषः इति मया चिन्तितम् । किन्तु कीदृशः एषः भवतः व्यवहारः? किमर्थम् एतादृशम् अन्याय्यं कृतवान्?'' इति ।

किञ्चित्कालं तूष्णीं स्थित्वा ततः देवदूतः अवदत्- "रामदासः मया विचिन्त्य एव तथा कृतम् । तस्य कारणं शृणोतु - आवाभ्यां दृष्टः प्रथमः धनिकः दयालुः धर्मिष्ठश्च । किन्तु सः दुरभिमानी । अतः एव सः सुवर्ण-रजतपात्रेषु भोजनं परिवेश्य स्वीयसम्पत्तेः प्रदर्शनं कृतवान् । तस्य सुवर्णपात्रम् अपहृतं यत् तत् तस्य दण्डनाय एव । किमर्थम् ईश्वरः कतिपयजनेभ्यः अधिकां सम्पत्तिं यच्छति ? दीनानां साहाय्यं कुर्वन्तु इत्येव। न तु अहङ्कारम् अनुभवितुम् ।

द्वितीयः सः कृपणः स्वभावतः न दानशीलः तथापि अद्य भवतः

மரியாதையுடன் வரவேற்றான். பிறகு அவர்கள் கொண்டாட்டங்களில் கலந்துக் கொள்ள சென்றனர். தொட்டிலில் தூங்கும் குழந்தை இருந்த உள் அறைக்குள் தேவதையும், தனிமை விரும்பியும் சென்றனர். அந்த அறைக்குள்ளோ, தொட்டிலின் பக்கத்திலோ யாருமில்லை. எல்லோரும் மற்ற இடங்களில் கொண்டாட்டத்தில் ஈடுபட்டு இருந்தனர். குழந்தையை ஆசிர்வதிக்கும் சாக்கில் தேவதை குழந்தையின் அருகில் சென்று யாரும் கவனிக்காதபடி குழந்தையின் கழுத்தை நெறித்தது. இதைப் பார்த்த ராமதாஸ் மிகவும் கோபமடைந்தான். ஆனால் திரும்பவும் அப்போதைக்கு எந்தவித சலனமுமில்லாமல் அமைதியாக இருந்தான். விரைவில் அவர்கள் குகைக்கு திரும்பினர்.

"நீ கடவுள் அனுப்பிய தூதுவனாக இருப்பதால் உன்னிடம் நன் நடத்தை செய்கைகளைத் தான் எதிர்பார்க்கிறேன். ஆனால் இன்று நீ செய்த எல்லா காரியங்களையும் கவனித்தேன். உன்னுடைய செய்கைகளை உன்னால் நியாயப்படுத்த முடியுமா? என்று எனக்கு சொல்" என்று குகையை அடைந்தவுடன் கோபத்துடன் ராமதாஸ் தேவதையை கேட்டான். சிறிது நேரம் மௌனம் சாதித்த தேவதை, "ராமதாஸ் நான் கூறும் விளக்கங்களை கவனமாகக் கேள்" என்றது.

முதலாவது, நமக்கு அன்னமிட்ட பணக்காரன் ஒரு அன்பான தர்ம சிந்தனையுள்ள மனிதன். ஆனால் தன்னிடமுள்ள பணக்காரத்தனத்தை வெளிப்படுத்தும் ஆர்வம் இருந்தது. நம் இருவருக்காக தங்கம், வெள்ளி பாத்திரங்களில் பரிமாற என்ன அவசியம் இருந்தது? ஒரு தங்க பாத்திர இழப்பு அவனுக்கு கொடுத்த தண்டனை மாதிரி. கடவுள் ஏன் சிலருக்கு அதிக செல்வத்தை கொடுக்க வேண்டும்? - அதை மற்றவர்களுக்கு காண்பிப்பதற்கு அல்ல. கஷ்டத்தில் இருப்பவர்களுக்கு உதவி செய்வதற்காக.

இரண்டாவது, கருமி எதையும் மற்றவர்களோடு பகிர்ந்து கொள்வதில்லை. இருந்தாலும் உன் கெஞ்சலுக்காக நம் இருவருக்கும் சிறிது தண்ணீர் கொடுக்க ஒப்புக் கொண்டான். அவன் வருங்காலத்தில் இன்னும் அதிக தான தர்மங்களை செய்ய

प्रेरणया जलं दत्वा पिपासितयोः आवयोः उपकारं कृतवान् । अतः तस्मै सुवर्णपात्रम् उपहाररूपेण मया दत्तम् । तेन न केवलं सः दानशीलः भविष्यति, अपि तु तेन ज्ञायते यत् सत्कर्माणि शीघ्रमेव फलदायकानि भवन्ति इति ।

अन्यौ तौ च धनिकदम्पती पुत्रलाभाय बहूनि सत्कर्माणि कृतवन्तौ इति तु सत्यम् । परन्तु पुत्रलाभानन्तरं न किञ्चित् सुकृतं कृतवन्तौ । अन्यच्च शिशुम् उपेक्षमाणौ अधर्मकार्येषु व्यापृतौ अपि । तयोः स्वभाव परिष्काराय कठिनं दण्डनं दातव्यमेव । अतः मया तथा कृतम्। आगामिकाले यदा तयोः अपत्यं भविष्यति तदा तौ अप्रमत्तौ भविष्यतः'' इति ।

रामदासः देवदूतस्य विवरणं श्रुत्वा स्वस्य मूढतां ज्ञात्वा तं क्षमां प्रार्थितवान् । देवदूतः पुनः उक्तवान् - ''ईश्वरः मनुष्येण क्रियमाणं धर्मम् अधर्मं, न्याय्यम् अन्याय्यं च सर्वं जानाति। तदनुसारमेव तेभ्यः शुभाशुभ फलानि ददादि । ईश्वरस्य मानदण्डं ज्ञातुं मनुष्याः न शक्नुवन्ति । अहं भवन्तं स्वर्गं नेतुमेव आगतः। किन्तु अद्यापि भवान् चिन्तयति यत् ईश्वरस्य कर्माणि सर्वाणि मानवानुगुणानि इति । भवतः चिन्तनम् इतोऽपि अपक्वम् । अतः भवता इतोऽपि कञ्चित् कालं यावत् भूलोके एव स्थातव्यम् । तदनन्तरमेव भवान् स्वर्गम् आगन्तुम् अर्हः भविष्यति'' इति ।

एवम् उक्त्वा देवदूतः तिरोभूतः अभवत् । रामदासः देवदूतस्य पुनरागमनं प्रतीक्षमाणः तत्रैव स्थितवान् ।

மற்றும் நல்ல செய்கைகளுக்கு ஏற்ற வெகுமதிகள் எப்போதும் கிடைக்குமென்ற படிப்பினை புகட்ட, தங்கப் பாத்திரத்தைக் கொடுத்தது ஊக்கமளிக்கும்.

மூன்றாவது, அந்த பணக்கார தம்பதியர் பல நல்ல காரியங்களை செய்த போதிலும், மகன் பிறந்த பிறகு, நல்லது எதுவும் செய்யவில்லை. அதுமட்டுமல்லாமல், கொண்டாட்டங்களில் கலந்து கொள்வதற்காக குழந்தையை தனியாக விட்டு விட்டனர். அவர்கள் உண்மையிலேயே நல்லவர்கள் அல்ல. அவர்கள் தங்கள் குணங்களை மாற்றிக் கொள்ள, கடும் தண்டனை தேவைப்பட்டது. இனிமேல் அவர்களுக்கு குழந்தை பிறந்தால், இவ்வாறு நடந்து கொள்ள மாட்டார்கள்.

தேவதையின் விளக்கங்களைக் கேட்ட வயதான தனிமை விரும்பி ராமதாஸ், தன் முட்டாள் தனத்தை உணர்ந்து, தன்னை மன்னிக்கும்படி வேண்டினான். "கடவுளின் செய்கைகள் மனிதர்களால் புரிந்துக் கொள்ள முடியாது. கடவுள் தன் கருணையினால் மனிதர்களுக்கு அவர்களது செய்கைகளுக்கேற்றவாறு நியாயம் வழங்குகிறார். நல்லது, கெட்டது, நியாயம், அநியாயம் எல்லாம் கடவுளுக்குத்தான் புரியும். நம்மால் அவற்றை புரிந்து கொள்ள இயலாது. நான் உண்மையிலே உன்னை சொர்க்கத்துக்கு அழைத்துச் செல்லதான் வந்தேன். கடவுள் எதைச் செய்தாலும் தன் படைப்புக்கு நல்லது தான் செய்வார் என்பதை இந்த நிமிடம் வரை நீ புரிந்துக் கொள்ளவில்லை. இந்த உண்மை உனக்கு புரியும் காலம் வரை, நீ இங்குதான் இருக்க வேண்டும் அப்பொழுதுதான் சொர்க்கத்தில் நுழைய தகுதித் பெறுவாய்" என்று தேவதை கூறியது.

இதைக் கூறிய பிறகு தேவதை மறைந்து விட்டது. தேவதை தோன்றுவதற்காக ராமதாஸ் காத்துக் கொண்டிருக்கிறான்.

12. किमस्ति पेटिकायाम् ?

नीलाम्बा काचित् वृद्धा, धनिका च। तस्याः चत्वारः पुत्राः। सा स्वस्य सप्ततितमे जन्मदिने स्वीयं धनं सर्वं समानतया विभज्य पुत्रेभ्यः दत्तवती। उक्तवती च-"पुत्राः ! इतःपरम् अहं वर्षे त्रीन् मासान् यावत् भवत्सु एकैकस्यापि गृहे पर्यायक्रमेण वसिष्यामि" इति।

नीलाम्बा स्वकथनानुसारं पुत्रगृहाणि गच्छन्ती कानिचन वर्षाणि यापितवती। कालक्रमेण पुत्रगृहेषु तस्याः स्वागतं न्यूनं भवति स्म। यतः तेषां लक्ष्यं तु आसीत् धनार्जने एव। स्वकीयं धनं सर्वम् एतावता एव दत्तवती आसीत् सा।. पुत्राणाम् एतादृशेन व्यवहारेण नीलाम्बा नितरां खिन्ना अभवत्।

एकदा अकस्मात् नीलाम्बा सखीं स्वर्णाम्बां दृष्टवती। दीर्घकालं यावत् तयोः मध्ये आत्मीयः वार्तालापः प्राचलत्। नीलाम्बा सखीं स्वस्य क्लेशान् सर्वान् उक्तवती। तत् श्रुत्वा स्वर्णाम्बा किञ्चित्कालं यावत् चिन्तयित्वा नीलाम्बायाः कर्णे किमपि उक्तवती। तेन नीलाम्बा सन्तुष्टा जाता।

12. பணப்பெட்டி

நீலிமா ஒரு வயதான பணக்காரப் பெண்மணி. அவளுக்கு நான்கு பிள்ளைகள். தன்னுடைய 70வது பிறந்த நாளன்று தன்னுடைய எல்லா சொத்துக்களையும் நான்கு மகன்களுக்கும் சமமாகப் பிரித்து கொடுத்தாள். இனி வரும் நாட்களில், ஒவ்வொரு மகனுடனும் மூன்று மாதங்கள் தங்கப் போவதாகவும் அறிவித்தாள்.

அவ்வாறு சில வருடங்களை ஒரு மகன் வீடு மாற்றி அடுத்த மகன் வீடு என்று கழித்தாள். நாளாக தனக்கு கொடுக்கப்படும் வரவேற்பு குறைந்து கொண்டே வருவதை கவனித்தாள். இப்பொழுது மகன்களின் உண்மை சொரூபம் அவளுக்குப் புரிந்தது. பணம் ஒன்றே அவர்களுக்கு பிரதானமாக இருந்தது. மனித உறவுகள் தாயாரை பேணுதல் எல்லாம் அடுத்தபடிதான், என உணர்ந்து அவள் மிகவும் மனம் வருந்தினாள்.

ஒருநாள் தான் வசிக்கும் வீட்டிற்கு அருகாமையில் வசிக்கும் தன்னுடைய பழைய தோழி யான பிரதிமாவிடம் தன் குறைகளைக் கூறினாள். பிரதிமா சிறிது யோசித்து விட்டு என்ன செய்ய வேண்டுமென்று நீலிமாவுக்கு அறிவுரை கூறினாள். தன் தோழிக்கு நன்றி சொல்லி விட்டு, மனப்பாரம் இறங்கியவளாய், மகிழ்ச்சியுடன் நீலிமா வீடு திரும்பினாள்.

சில நாட்களுக்குப் பிறகு, ஒரு மாலை நேரத்தில், நீலிமா யாரிடமும் தான் எங்கு போகிறேன் என்று சொல்லாமல் வீட்டுக்கு வெளியே சென்றாள். ஒரு மணி நேரம் கழித்து திரும்பி வந்தாள். அவள் ஆடைகளில் அங்கும் இங்கும் சேறாக இருந்தது. வேலைப்பாடு உடைய பணப்பெட்டியொன்று அவள் கைகளில் இருந்தது. அவளது தோற்றத்தைப் பார்த்த மகன் அவளிடம், என்ன காட்சி இது? உன் ஆடைகள் எல்லாம் சேறாக உள்ளது, எங்கு சென்றாய்? இந்தப் பெட்டி எங்கு கிடைத்தது? அதனுள் என்ன இருக்கிறது என்று கேட்டாள். இவ்வளவு கேள்விகளையும் கேட்ட

अन्यस्मिन् दिने सायङ्काले नीलाम्बा गृहात् बहिः गतवती। कुत्र गच्छामि इति पुत्रम् अनुक्त्वा एव सा गतवती आसीत्। प्रत्यागमनसमये तस्याः हस्ते एका पेटिका आसीत्। तया धृतानि वस्त्राणि च मलिनानि आसन्।

हस्ते पेटिकां गृहीतवतीं मातरं दृष्ट्वा पुत्रः पृष्टवान्- "अम्ब ! किम् एतत्? भवत्याः वस्त्राणि मलिनानि, हस्ते एका पेटिका अस्ति। कुत्र लब्धा एषा पेटिका ? तस्याः अन्तः किम् अस्ति ? कुत्र गतवती आसीत् भवती ?" इति।

"वत्स, एषा पेटिका भूमेः अन्तः मया एव निक्षिप्ता आसीत्। एतस्यां बहूनि अमूल्यवस्तूनि सन्ति। सर्वं भवताम् अभ्युदयाय एव। किन्तु मम मरणानन्तरं भवन्तः एतेषां वस्तूनाम् उपयोगं कर्तुम् अर्हन्ति" इति उक्त्वा नीलाम्बा अन्तः गतवती। एतत् श्रुत्वा आश्चर्यचकितः सः पुत्रः स्वभ्रातॄन् सर्वान् एतं विषयम् उक्तवान्। सर्वे भ्रातरः तस्मिन् विश्वसितवन्तः, चिन्तितवन्तः च-'एतादृश्यः अन्याः अपि पेटिकाः भूमेः अन्तः तया निक्षिप्ताः स्युः' इति।

एतदनन्तरं तु पुत्राः मातरं सम्यक् पालयन्ति स्म। नीलाम्बा पुत्राणां सदाचारेण सन्तुष्टा सती सन्तोषेण कालं यापितवती।

पुनः कानिचन वर्षाणि अतीतानि। एकस्मिन् दिने रात्रौ नीलाम्बा दिवङ्गता।

नीलाम्बायाः अन्त्यकर्मसु साहाय्यं कर्तुं. तस्याः सखी स्वर्णाम्बा आगता आसीत्। सा गमनसमये नीलाम्बायाः पुत्रान् आहूय एकां कुञ्चिकां दत्त्वा उक्तवती - "सा माम् उक्तवती आसीत् 'मरणानन्तरम् एषा कुञ्चिका

பிறகும் தன் நிதானத்தை இழக்காமல், மகனே! பூமிக்கடியில் இந்தப் பெட்டி புதைக்கப்பட்டிருந்தது. இதில் மிக விலை உயர்ந்த பொருட்கள் உள்ளன. இவையனைத்தும் உங்களது செழிப்புக்குத்தான். நான் செத்த பிறகுதான் இதனுடைய உபயோகம் உங்கள் எல்லோருக்கும் புரியும் என்று கூறினாள். இதைக் கேட்ட மகன் மிகவும் ஆச்சரியமடைந்தான். தன் மற்ற சகோதரர்களுக்கும் இந்த எதிர்பாராத நற்செய்தியை தெரியப்படுத்தினான். விலை மதிக்கமுடியாத பொருட்கள் அந்த பெட்டியில் இருக்க வேண்டும் என்று சகோதரர்கள் நால்வரும் முடிவு செய்தனர். இது மட்டுமல்லாமல், இன்னும் நிறையப்பெட்டிகள் பூமிக்கடியில் புதைக்கப்பட்டிருக்கலாம் என்றும் முடிவு செய்தனர்.

சில வருடங்கள் கழிந்தன. நீலிமா மகன்களால் நன்றாக கவனித்துக் கொள்ளப்பட்டாள். வாழ்க்கையின் மகிழ்ச்சியை அனுபவித்தாள். பிறகு நீலிமா ஒரு இரவு தூக்கத்தில் இறந்தாள். அவளுடைய பழைய சிநேகிதி பிரதிமா, இறந்தபின் நடக்கும் சடங்குகளில் கலந்து கொள்ள வந்தாள். நீலிமா ஒரு சாவியை பத்திரமாக வைத்திருக்கும்படி தன்னிடம் கொடுத்ததாக கூறி, பிரதிமா சாவியை, தன் வீட்டிற்கு கிளம்பும் முன் நீலிமாவிள் மகன்களிடம் கொடுத்தாள். சாவியைப் பெற்றுக் கொண்ட நீலிமாவின் மகன்கள் உடனடியாகத் தாயாரின் அறைக்கு சென்று பெட்டியைத் திறந்து, அதில் என்ன இருக்கிறது என்று பார்த்தனர். அவர்கள் மிகுந்த ஆவலுடனும் எதிர்பார்ப்புகளோடும் அதைச் செய்தனர். என்ன பேரிடி! அந்தப் பெட்டி நிறைய கற்கள் இருந்தன.

மகன்கள் ஏமாற்றமும் அதிர்ச்சியும் அடைந்தனர். என்ன செய்வது என்று அறியாமல் பெட்டியில் உள்ளவற்றை தலைகீழாகக் கொட்டினர். என்ன பிரயோசனம்! பணமோ அல்லது விலை உயர்ந்த பொருளோ இல்லை. ஆனால் நீலிமா எழுதிய குறிப்பு ஒன்றை அவர்கள் கண்டனர். குறிப்பில் இருந்தது - நீங்கள் எல்லாரும்

पुत्रेभ्यः दातव्या' इति''।

नीलाम्बायाः पुत्राः अनुक्षणं प्रकोष्ठं गत्वा तां पेटिकाम् उद्घाटितवन्तः। अहो...., पेटिकायां शिलाखण्डाः एव पूरिताः सन्ति ! तत् दृष्ट्वा सर्वे पुत्राः निराशतया स्तम्भिताः अभवंन्। ते शिलाखण्डान् निष्कास्य पुनः पुनः परिशीलितवन्तः। पेटिकायाम् अमूल्यं वस्तु किमपि न आसीत्। परन्तु एका चीटिका आसीत्। चीटिकायां लिखितम् आसीत् - "पुत्राः ! एतद् दृष्ट्वा भवतां निराशा भवति इति मन्ये। एतादृशः कपटोपायः मया आचरितः इति अहं दुःखिता अस्ति। परन्तु भवतां बोधनाय एव मया एवं कृतम्। जीवने धनम् आवश्यकमेव। किन्तु धनमेव जीवनं न'' इति।

तत् पठित्वा पुत्राः लज्जिताः अभवन्।

ஏமாற்றம் அடைவீர்கள் என்று எனக்குத் தெரியும். வேறு வழியில்லாமல் இதைச் செய்ததற்கு நான் வருந்துகிறேன். ஆனால் என்னுடைய வயதான காலத்தில், எனது மகன்கள் என்னை நல்லவிதமாக கவனித்துக் கொள்ள, இதைச் செய்ய வேண்டியிருந்தது. தயவுசெய்து என்னை மன்னியுங்கள். உங்கள் எல்லோருக்கும் என்னுடைய கடைசி அறிவுரை என்னவென்றால், "நீங்கள் கடமை உணர்வோடு இருக்க வேண்டும். அன்பு கலந்த இதயத்தோடு பெற்றோர்களை கவனித்துக் கொள்ள வேண்டும். பணம் தேவைதான். ஆனால் அது தற்காலிகமானது! அன்பும், ரத்த பிணைப்புகளும் அவ்வாறில்லை".

குறிப்பை படித்தபின், மகன்கள் தங்களை நினைத்து வருத்தப்பட்டார்கள். தங்கள் குழந்தைகளை வளர்ப்பதிலாவது இத்தைகைய நற்பண்புகளை கடைபிடிப்பது என்று எல்லோரும் சேர்ந்து சூளுரைத்தனர்.

RASHTRIYA SANSKRIT SANSTHAN DEEMED UNIVERSITY (UNDER MINISTRY OF H.R.D. GOVT. OF INDIA)
ACCESSION NO 23847
DATE 13/12/06

CENTRAL SANSKRIT UNIVERSITY
(Under Ministry at Education, Govt. of India)
GURUVAYOOR CAMPUS LIBRARY
Due Date Slip

Title : Kathanjali

Author : Shanta Venkataraman

Acc. No. 23847

This book should be returned to the library on or before the date last stamped. Otherwise over-due charges of ₹1/- per book per day will be collected.

Due date of Return	Due date of Return	Due date of Return
11 FEB 2025		
21 AUG 2025		
24 SEP 2025		
03/10/25		

CSUGCKL
015,3N
4
23847
Acc.No: 23847